।। श्रीराम ।।

।।ॐ।।



॥श्रीगणेशायनमः॥ श्रीलक्ष्मीनृसिंहायनमः॥ श्रीमहापुरुषायनमः॥

वसंते ॥२॥ हरिः ॐ ॥ एकादश्यां पौर्णमास्यां वारंभः। तस्मिन्दिने प्रातरग्निहोत्रं
हुत्वा सोमेनयक्ष्यमाणो पुण्याहं वाचयित्वापरेणाग्निं दर्भेष्वासीनो
दर्भान्धारयमाणः पवित्रपाणिः पत्न्यासह प्राणानायम्य संकल्पं
करोति। विच्छिन्नसोमपीथसंधानार्थं मैत्रावरुणं पशु दौर्बल्यस्य
निर्हरणार्थं माभिनं पशुमग्नीषोमीयेन पशुनासहोपालभं कुर्वन्सो-
मेन यक्ष्ये ज्योतिष्टोमेनाग्निष्टोमेन रथंतरसाम्ना द्वादशशतदक्षिणेन
तेन श्रीपरमेश्वरं प्रीणयानि। विभुदसि। अस्मिन् ज्योतिष्टोमे
विहिते सोमे सोमप्रवाकं त्वामहं वृण इति वृत्वा मधुपर्कादिभि
रभ्यर्च्य। सोमप्रवाक सोमं मे प्रब्रूतादित्युक्त्वा इत्याह। केभ्य इति
सोमप्रवाकेनोक्तः विष्णुशर्मादिभ्य इत्याह॥ अथ सोमप्रवाको
दौर्बल्यनिर्हरणार्थं प्रवर्ग्यं च कुर्वन्॥६

सोम
॥१११
(४)

अर्धात

॥३॥

ध्वर्युगृहं गत्वा यज्ञशर्माणः सोमो भविष्यतीति तत्र भवता आध्वर्यवं
कर्तव्यमित्याह । अध्वर्युस्तं पृच्छति क ऋत्विज आधानादिषु कर्मसु ।
देवदत्तादय इत्याह सोमप्रवाकः । पुनश्च के याजयन्तीति पृच्छति ।
विष्णुमित्रादय इत्याह । कच्चिन्नाहीन इति पृष्टे । नाहीनो ज्योतिष्टोमोऽग्नि-
ष्टोम इत्याह । कच्चिन्न्यस्तमार्त्विज्यमिति पृष्टे । न न्यस्तमार्त्विज्यं
यजमान दोषेणेत्याह । कच्चित्कल्याण्यो दक्षिणा इति पृष्टे । सन्ति
कल्याण्यो दक्षिणाः सुरूपा बहुमूल्या द्वादशशतं गाव इत्याह । अथा-
ध्वर्युः । महन्मेऽवोचो भर्गो मेऽवोचो यशो मेऽवोचः स्तोमं मेऽवोचः
कॢप्तिं मेऽवोचो भुक्तिं मेऽवोचः सर्वं मेऽवोचस्तन्मावतु तन्माविशतु

(५) [illegible] प्रतिप्रस्थातारं नेष्टारमुन्नेतारमित्यध्वर्युगण । ब्रह्माणं ब्राह्मणाच्छंसिनमाग्नीध्रं पोतारमिति ...
होतारं मैत्रावरुणमच्छावाकं ग्रावस्तुतमिति होतृगण । उद्गातारं प्रस्तोतारं प्रतिहर्तारं सुब्रह्मण्यमित्युद्गा...

तेन भुक्षिषीय । जपित्वा । पद्मा नामासि स्तुतिः सोमसरणी सोमं
॥४॥ गमेयम् । पन्थानमातिष्ठते । देवो देवमेतु सोमः सोममेत्वृतस्य
पथा विहाय रौष्कृत्सम् । अभिप्रव्रजति । यजमानगृहं प्राप्य ।
पितरो भूः । प्राचीनावीती दक्षिणावृतः स्वान्पितॄनुपतिष्ठते । जीव-
त्पितृकस्य नोपस्थानम् । यज्ञोपवीत्यप उपस्पृश्य । एवं ब्रह्माणं
होतारमुद्गातारं च वृणीते । तान्वृणीते चतुरः सर्वान्वा । यजमानः ।
अग्निर्मे होतेत्युपांशूक्त्वा कृष्णशर्मा मानुष इत्युच्चैः । आदित्यो मेऽध्वर्यु-
रित्युपांशूक्त्वा विष्णुशर्मा मानुष इत्युच्चैः । चन्द्रमा मे ब्रह्मेत्युपांशूक्त्वा
रुद्रशर्मा मानुष इत्युच्चैः । पर्जन्यो म उद्गातेत्युपांशूक्त्वा शिवशर्मा मानुष (५)

२॥ (६) इत्युच्चैः। चतुर्णां वरणपक्षे मन्त्रवरणेन वृता एवेतरे स्वस्वकर्मभ्यः पुरस्ता-
दमुकं त्वामहं वृणेऽमुकं त्वामहं वृण इति वृताः कर्म कुर्वन्ति। सर्ववरण-
॥६॥ पक्षे पूर्वोक्तानन्तरं आकाशो मे सदस्य इत्युपांशूक्त्वामुकशर्मा मानुष
इत्युच्चैः। आपो मे होत्राशंसिन इत्युपांशूक्त्वामुकादि शर्माणो मानुषा
इत्युच्चैः। इति होतृकान्। रश्मयो मे चमसाध्वर्यव इत्युपांशूक्त्वा यज्ञ-
दत्तादि शर्माणो मानुषा इति हस्तेव चमसाध्वर्यून्युगपद्वृणीते। ततो
वरणक्रमेण तेभ्यो मधुपर्कं ददाति स्वस्वगृह्योक्तेन विधिना [प्रथमं
होत्रे ततोऽध्वर्यवे यजमानः कूर्चं ददाति। अध्वर्युः। राष्ट्रभृदस्याचार्या
सन्दी मा त्वद्योषम्। तस्मिन्नुपविशति। आपः पाद्याः पाद्यमुदकं प्रयच्छति।
आपः पादावनेजनीर्द्विषन्तं नाशयन्तु मे। अस्मिन्कुले ब्रह्मवर्चस्यसानि। (६)
॥२॥

इति पाद्यमवेक्षते । यजमानस्तेनोदकेनाध्वर्योः पादौ प्रक्षालयति । अध्वर्युः
॥६॥ प्रक्षालयितारमुपस्पृश्य । मयि महो मयि यशो मयीन्द्रियं वीर्यम् । आ-
त्मानं प्रत्यभिमृश्यापउपस्पृश्य । पुष्पगंधादियुक्तमर्घ्यं मृन्मये निधाय
कूर्चाभ्यां परिगृह्य अर्हणीया आप इति प्रयच्छति । अध्वर्युः । आ मा
गन् यशसा वर्चसा सꣳसृज पयसा तेजसा च । तं मा प्रियं प्रजानां
कुर्वधिपतिं पशूनाम् । अभिमंत्र्य । विराजो दोहोसि विराजो दोहमशीय
मम पद्याय विराज । अंजलावेकदेशे आनीयमाने जपति । समुद्रं वः
प्रहिणोमि स्वां योनिमपिगच्छत । अच्छिद्रः प्रजया भूयासं मा परा-
सेचि मत्पयः । शेषं पुरस्तान्निनीयमानम् । दधिमधु सꣳसृष्टं काꣳस्ये
निधाय वर्षीयसा काꣳस्य पात्रेणापिधाय कूर्चाभ्यां परिगृह्य मधुपर्कं

३॥ इत्याह। अध्वर्युः। श्रियै विश्वाये यशोऽसि यशांसो यशोऽसि ब्रह्मणो दीप्तिरसि।
(८) त्वं मा श्रियं प्रजानां कुर्वधिपतिं पशूनाम्॥ आमा गन् यशसा० पशूनाम्॥
॥६॥ इति च द्वाभ्यामभिमंत्र्य। अमृतोपस्तरणमसि। अप आचामति। यन्मधुनो
मधव्यं परममन्नाद्यं वीर्यम्। तेनाहं मधुनो मधव्येन परमेणान्नाद्येन वी-
र्येण परमोऽन्नादो मधव्योऽसानि। इति त्रिः प्राश्य सकृन्मंत्रेण द्विस्तूष्णीं।
प्राश्य हस्तौ प्रक्षाल्य। यजमानः। अपिधानीया आपः। अध्वर्युः। अमृतापि-
धानमसि। पुनराचामति। अस्मिन्काले वस्त्राभरणादिभिरलंकृत्य। गौरि-
त्युक्ते। अध्वर्युः। यशो नर्धितां यशस्य पृथिमनु वर्धोऽपचितिरस्यपचितिं
मा कुर्वपचितोऽहं मनुष्येषु भूयासम्। गौर्धेनु भव्या माता रुद्राणां दुहिता
^ गौरस्यपहत पाप्मावपाप्मानं जहि (८)

(१) वसूनां स्वसादित्यानाममृतस्य नाभिः । प्र नु वोचं चिकितुषे जनाय मा
गामनागामदितिं वधिष्ट ॥ पिबतूदकं तृणान्यत्तु । उपांशु ब्रूयात् । [redacted]
॥८॥ [redacted] । सिद्धमन्नं भूतमित्युक्ते । अध्वर्युः । भूतं । सा विराट् । त-
न्मोक्षायि तस्य तेऽशीय तन्म ऊर्जं धाः । उपांशु ब्रूयात् । ओं कल्पयतेत्युच्चै-
र्ब्रूयात् । ततो ब्रह्मोद्गातृसदस्यानां स्वस्व शाखोक्तप्रकारेण मधुपर्कः ।
सर्वेभ्यो मधुपर्कं दत्वा । देवता एनोपतिष्ठेत । सक्षेदं पश्य विधर्तरिदं पश्य
नाकेदं पश्य । रमतिः पनिष्ठर्तं वर्षिष्ठममृता यान्याहुः सूर्यो वरिष्ठो
अक्षभिर्विभात्यनु द्यावापृथिवी देवपुत्रे । ततो यजमानो नांदीश्राद्धं करोति ।
अयं ते योनिः० रयिं ॥ इत्यरणी गार्हपत्ये समारोप्य यज्ञोपकरणैः सह
पत्न्यन्वारब्धो देवयजनं गत्वा पादौ प्रक्षाल्याचम्य । एदमगन्म देवयजनं

ोम

मा। पृथिव्या विश्वैर्देवा यद जुषंत पूर्वे ऋक्सामाभ्यां यजुषा संतरंतो रायस्पोषेण
(१०) । समिषा मदेम ।। यजमानो देवयजनमध्यवस्यति ।उद्धत्यावोक्ष्य । ततो मथित्वा । मंथ०
॥७॥ उपावरोह जातवेद० नो दुरोणे ।। आयतने निधाय द्रव्यनिर्देशं करोति । आज्यं
पशवः पुरोडाशीया एते मे यज्ञार्था यावयज्ञ उभयोक्ष्ये तावन्मे यज्ञार्थं शेषा--
ब्राह्मणा भुंजीरन् । अध्वर्युः । आहवनीयं विहृत्य संभारयजूंषि जुहोति ।

संभार होम

अग्निर्यजुर्भिः स्वाहा । अग्नये यजुर्भ्य इदं । सविता स्तोमैः स्वाहा । सवित्रे स्तोमेभ्य
इदं । इन्द्र उक्थामदैः स्वाहा । इन्द्रायोक्थामदेभ्य इदं । मित्रावरुणा वाशिषा
स्वाहा । मित्रावरुणाभ्यामाशिष इदं । अंगिरसो धिष्णियैरग्निभिः स्वाहा ।
अंगिरोभ्यो धिष्णियेभ्योऽग्निभ्य इदं । मरुतः सदो हविर्धानाभ्यां स्वाहा । मरुद्भ्यः 9
सदो हविर्धानाभ्यामिदं । आपः प्रोक्षणीभिः स्वाहा । अद्भ्यः प्रोक्षणीभ्य इदं। (१०) ॥७॥

(११) ओषधयो बर्हिषा स्वाहा । ओषधीभ्यो बर्हिष इदं । अदितिर्वेद्या[९] स्वाहा । अदित्यै-
॥१०॥ वेद्या इदं । सोमो दीक्षया[१०] स्वाहा । सोमाय दीक्षाया इदं । त्वष्टेध्मेन[११] स्वाहा । त्वष्ट्र इध्मा-
येदं । विष्णुर्यज्ञेन[१२] स्वाहा । विष्णवे यज्ञायेदं । वसव आज्येन[१३] स्वाहा । वसुभ्य आ-
ज्यायेदं । आदित्या दक्षिणाभिः[१४] स्वाहा । आदित्येभ्यो दक्षिणाभ्य इदं । विश्वेदेवा[१५]
ऊर्जा स्वाहा । विश्वेभ्यो देवेभ्य ऊर्ज इदं । पूषा स्वगाकारेण[१६] स्वाहा । पूष्णे स्वगा-
कारायेदं । बृहस्पतिः पुरोधया[१७] स्वाहा । बृहस्पतये पुरोधाया इदं । प्रजापति-[१८]
रुद्गीथेन स्वाहा । प्रजापतय उद्गीथायेदं । अन्तरिक्षं पवित्रेण[१९] स्वाहा । अन्तरि-
क्षाय पवित्रायेदं । वायुः पात्रैः[२०] स्वाहा । वायवे पात्रेभ्य इदं । अहं श्रद्धया[२१]
स्वाहा । महं श्रद्धाया इदं ॥ अपरिस्त्रुत्याग्निम् । अत्र राजानमाहृत्य अध्वर्यु-

(११)

५॥ बलयजमानाः नमः सोमाय राज्ञ इति गंधादिभिरभ्यर्च्य पयसौदनेन परिवे-
१२ विषन्त्या ब्रूयात् । अग्निं परिस्तीर्य । पुनर्विहृत्य सप्तहोतारं मनसानुद्रुत्याहव-
११ नीये सग्रहं जुहोति । महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा अग्नीत् ।
अच्युतमना उपवक्ता । अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ । अया-
स्य उद्गाता । वाचस्पते हृद्विधे नामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम ।
वाचस्पतिः सोममपात् । मा दैव्यस्तंतुश्छेदि मा मनुष्यः । नमो दिवे नमः पृथिव्यै
स्वाहा । वाचस्पतये ब्रह्मण इदं । अग्निं परिस्तीर्य । दीक्षणीयार्थं गार्हपत्या-
दाहवनीयमुद्धृत्य दक्षिणाग्निं प्रणीयाहवनीयं प्रणयति । स्वे दक्षे दक्षपितेह
सीद देवानां सुम्नो महते रणाय । स्वासस्थस्तनुवा संविशस्व पितेवैधि

१३ सुनव आ सुश्लोव: । शिनो मा शिवमाविंश सत्यं मे आत्मा श्रद्धा मेऽक्षिति-
॥१५॥ स्तपो मे प्रतिष्ठा । सवितृप्रसूता मा दिशो दीक्षयन्तु सत्यमस्मि । पुरस्ता-
द्दीक्षणीयाया आहवनीयं यजमान उपतिष्ठते । अध्वर्यु: । देवा गातुविद इत्यादि ।
अद्य यज्ञाय । इमामूर्जमेकादशीं । दैक्षणीयं हवि: । पौर्णमासं तंत्रं बर्हिराहृत्य
व्रतप्रवेश: । सप्तदश सामिधेन्य: । आरंभत: प्राग्यदि होमकालो हुत्वाग्निहोत्रं
त्वथ दीक्षणीया । प्रधानयागात्पुरतो यदि स्यात्तदैव होम: परतो न होम: ।
ततस्त्वा त्रयो विंशत्तिधा । अलंकृत्य परिस्तीर्य । देवा देवेषु कर्मणेवामि-
त्यादि । एकादश कपालानि स्फ्यश्च द्वंद्वं । अन्वाहार्यस्थाली प्रणीता नर्जमितराणि ।
प्रकृतिवत् न प्रसवरणं । प्रस्ता तूष्णीमतिक्रम्य मंत्रेणोपविशति । अध्वर्यु: । यजमानवाचं यच्छ ।

१५। संदिग्नां तामेत्यादि निर्वपणकाले । अग्नाविष्णुभ्यां जुष्टं निर्वपामि । अग्नाविष्णू

हव्यं रक्षेथाम् । अग्नाविष्णुभ्यां वो जुष्टं प्रोक्षामि । अग्नाविष्णुभ्यां जुष्टमधिनिर्व-

१४ पामि । अग्नाविष्णुभ्यां जुष्टं संवपामीत्यादि । पत्नीं संनह्याज्येनोदेहीत्यादि।

॥१३॥ तूष्णीमभिघारणं । प्रियेण त्वासादनं । अयं यज्ञो ममाग्ने चतुर्होतारस्सन्नाभि-

आपध भाग सोम

मर्शनं । उपांशु प्रधानयागः । अग्नाविष्णुभ्यां अनुब्रूहि । अग्नाविष्णू यज ।

अनुष्टुकं अग्नाविष्णुभ्यामिदं । अग्नाविष्ण्वोरहं देवयज्यया वृत्रहा भूयासम् । न पार्वण-

होमः । अविरुद्ध प्रायश्चित्रं । न यजमानभागं । इडायां सामे सत्याशीराशीर्मे ऊर्ज-

मिति न भवति सवनीयपक्षिडांतं । न दक्षिणा । अग्नाविष्ण्वोरहमुज्जितिमनू- १४

ज्जेषं । एमा अग्मन्निति न भवति । पुरस्ताद्धन पत्नीभ्यः संपत्नीयं जुहोति ।

आज्येऽन्ता दीक्षणीया संतिष्ठते ॥ धारयति ध्रौवमाज्यम् ॥ प्राचीनवꣳशां
१५ करोति पुरस्तादुन्नतं पश्चान्निनतं सर्वतः परिश्रितम् । अवान्तरदिक्षु स्रक्तयः ।
॥१४॥ स्रक्तिष्वारोकान्करोति । प्रतिदिशं द्वाराणि । उत्तरेण बहिः प्रागवꣳशां
परिश्रिते यजमानः केशश्मश्रु वापयते । अध्वर्युः । आप उन्दन्तु जीवसे दीर्घा-
युत्वाय वर्चसे । दक्षिणं गोदानमद्भिरुनत्ति । ओषधे त्रायस्वैनं । प्रागग्रं-
दर्भमन्तर्धाय । ओषधे त्रायस्व मां । यजमानो जपति । स्वधिते मैनꣳ हिꣳ
सीः । स्वधितिनाभिनिधाय । स्वधिते मा मा हिꣳसीः । इति यजमानो जपति ।
देवश्रूरेतानि प्रवपे । प्रवपति । स्वस्त्युत्तराण्यशीय । इति यजमानः । १५
एवमुत्तरं गोदानम् । आप उन्दन्त्वित्याद्यशीयेत्यंतं । उपपक्षावग्रेऽथ श्मश्रूण्य-

गोभ

१७॥ थ केशान्। पत्न्या [redacted]पपक्षश्मश्रूणां [redacted] केशवर्जं नखनिकृंतनमुभयोः।
[redacted] सव्यस्याग्रे कनिष्ठिकातोऽभ्यन्तरं नखानि कारयते। हस्त्योन्यग्रेऽथ पद्यानि। हस्ता
१६ शौचार्थं स्नात्वौदुम्बरेण दतो धावते लोहितमनभिगमयन्। स्थावरास्वप्सु
१९६॥ स्नाति शङ्खिनीष्वनकिनीषु लोमशे तीर्थे। कुण्डे हिरण्यमवधाय तस्मिन्
स्नातीति वाजसनेयकम्। आपो अस्मान्मातरः शुन्धन्तु घृतेन नो घृतपुवः
पुनन्तु विश्वमस्मत्प्रवहन्तु रिप्रं। हिरण्यवर्णाः शुचयः पावकाः प्रचक्रमुर्हि-
त्वावद्यमापः। शतं पवित्रा वितता ह्यासु ताभिर्नो देवः सविता पुनातु। हिर- १६
ण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भं
दधिरे विरूपास्तान आपः शं स्योना भवन्तु॥ उदाभ्यः शुचिरापूत एमि। [redacted]

(१७) उद्राहमानो जपति । उदोभ्यः शुचिरापूतैमि । इति पत्नी । द्विराचम्य । कपोलपरि-
।।१६।। मितमपोश्नाति पत्नी च । शुध्यर्थमाचमनमुभौ कुरुतः । अथास्मै क्षौममहतं
महद्वासः प्रयच्छत्यध्वर्युस्तद्यजमानः प्रतिगृह्णाति । दीक्षासि तपसो योनिस्त-
पोऽसि ब्रह्मणो योनिर्ब्रह्मासि क्षत्रस्य योनिः क्षत्रमस्यृतस्य योनिर्ऋतमसि
भूरारभे श्रद्धां मनसा दीक्षां तपसा विश्वस्य भुवनस्याधिपत्नीं सर्वे कामा
यजमानस्य सन्तु । सोमस्य तनूरसि तनुवं मे पाहि दीक्षासि तनूरसि तां त्वा
शिवां स्योनां परिधिषीय । तत्परिधाय । सोमस्य नीविरसि । नीविमनु-
परिकल्पयते । लौकिकं वासस्तूष्णीं पत्नी परिधत्ते । ऊर्जे त्वा । प्राग्वंशे-
ऽभक्षीतः सर्पिर्मिश्रं दधिमधु चाभ्युपसेकम् । यदस्य मनसः प्रतिप्रियं १७ १६

पूर्णानुमा...

ोम

८॥ तदश्नाति। तदेवास्यामुष्मिं लोके भवतीति विज्ञायते। हविष्यमुभौ भुक्त्वाचम्य॥

[redacted] लेपनपर्याप्तं नवनीतं त्रेधा विभज्यैकं भागं। महीनां पयोऽसि। दर्भपुञ्जीलाभ्यां-

१८ मुखौति। वर्चोधा असि वर्चो मयि धेहि। तेन पराचीनं त्रिरभ्यङ्क्ते। मुखमग्रेऽनुलोम-

॥१६॥ मंगानि त्रिस्तूष्णीं स्वक्तो भवति। वृत्रस्य कनीनिकासि। चक्षुष्पा असि चक्षुर्मे

पाहि। दर्भपुञ्जीलेनाभ्यन्तरं दक्षिणमक्षि येन केनाञ्जनेनाङ्क्ते अनिधावमानः सकृन्मं-

त्रेण त्रिस्तूष्णीमेवं सव्यम्॥ अथैनमुत्तरेण बहिः प्राग्वंशात् दर्भपुञ्जीला[redacted]-

नामेकविंशत्या त्रेधा विभक्तया सप्तभिः सप्तभिर्द्विरूर्ध्वं नाभेरुन्मार्ष्टि।

चित्पतिस्त्वा पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः। नाभेरूर्ध्वमु-

न्मार्ष्टि। चित्पतिर्मा पुनातु। यजमानो जपति। वाक्पतिस्त्वा पुनातु० रश्मिभिः।

पूर्ववदुन्मार्ष्टि। वाक्पतिर्मा पुनातु। यजमानो जपति। देवस्त्वा सविता पुना० रश्मिभिः।(१८)

२७ नाभेरधोभागमन्वंचं सकृन्निमार्ष्टि अलरमाणः । देवो मां सविता पुनातु । तस्य
॥१८॥ ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयं । पवमानः सुवर्जनः पूतं ब्रह्म
पुनीमह इत्यंतं यद्देवा देवहेडनमित्यच्छिद्रगता चानुवाकश्च पाव्यमानो जपति ।
देवोमेत्यारभ्य पूतं ब्रह्म पुनीमह इत्यंतं । पवमानः सुवर्जनः । पवित्रेण विचर्षणिः ।
यः पोता स पुनातु मा ॥ पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तु
विश्वे आयवः ॥ जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देवदीद्यत् ।
अग्ने क्रत्वा क्रतूं रनु ॥ यत्ते पवित्रमर्चिषि । अग्ने विततमंतरा । ब्रह्म तेन
पुनीमहे ॥ उभाभ्यां देव सवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ॥
वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठाः । तया मदंतः सध-
माद्येषु । वयं स्याम पतयो रयीणाम् ॥ वैश्वानरो रश्मिभिर्मा पुनातु । ।७१।

८॥ वातः प्राणे नैषिरो मयोभूः। द्यावापृथिवी पयसा पयोभिः। ऋतावरी यज्ञिये मा
(२७) पुनीतां॥ बृहद्भिः सवितस्तृभिः। वर्षिष्ठैर्देवमन्मभिः। अग्ने दक्षैः पुनाहि मा॥
॥९०॥ येन देवा अपुनत। येनापो दिव्यं कशः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्म पुनीमहे॥ यः
पावमानीरध्येति। ऋषिभिः संभृतꣳ रसं। सर्वꣳ स पूतमश्नाति। स्वदितं मातरि
श्वना॥ पावमानीर्यो अध्येति। ऋषिभिः संभृतꣳ रसं। तस्मै सरस्वती दुहे।
क्षीरꣳ सर्पिर्मधूदकं॥ पावमानीः स्वस्त्ययनीः। सुदुघाहि पयस्वतीः। ऋषिभिः
संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितं॥ पावमानीर्दिशन्तु नः। इमं लोकमथो अमुं।
कामान्समर्धयन्तु नः। देवीर्देवैः समाभृताः॥ पावमानी स्वस्त्ययनीः। सुदुघाहि
घृतश्चुतः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितं॥ येन देवाः पवित्रेण।
आत्मानं पुनते सदा। तेन सहस्रधारेण। पावमान्यः पुनन्तु मा॥ प्राजापत्यं पवित्रं। (२८)

(२१) गातोद्यामᳪ हिरण्मयं । तेन ब्रह्मविदो वयं । पूतं ब्रह्म पुनीमहे ॥ इति च । यद्देवा देव-
हेडनं । देवासश्चकृमा वयं । आदित्यास्तस्मान्मा मुञ्चन्तु । ऋतस्यर्तेन मामुत ॥

देवाजीवनकाम्यायत । वाचानृतमूदिम । अग्निर्मा तस्मादेनसः । गार्हपत्यः प्रमु-
ञ्चतु । दुरिता यानि चकृम । करोतु मामनेनसं ॥ ऋतेन द्यावापृथिवी । ऋतेन
त्वᳪ सरस्वति । ऋतान्मा मुञ्चताᳪहसः । यदन्यकृतमारिम ॥ सजातशᳪसादुतवा-
जामिशᳪसात् । ज्यायसः शᳪसादुतवा कनीयसः । अनाज्ञातं देवकृतं यदेनः ।
तस्मात्त्वमस्माञ्जातवेदो मुमुग्धि ॥ यद्वाचा यन्मनसा । बाहुभ्यामूरुभ्यामष्ठीवद्भ्यां ।
शिश्नैर्यदनृतं चकृमा वयं । अग्निर्मा० ॥ यद्धस्ताभ्यां चकर किल्बिषाणि । अक्षाणां
वग्नुमुपजिघ्नमानः । दूरे पश्या च राष्ट्रभृच्च । तान्यप्सरसावनुदत्तामृणानि ॥ अदीव्यं
नृणं यदहं चकार । यद्वा दास्यन्त्संजगारा जनेभ्यः । अग्निर्मा० ॥ यन्मयि माता गर्भे सति ।

पवन
पावन

१।। एतैश्चकार यत्पिता। अग्निर्मा०।। यदापिपेष मातरं पितरं। पुत्रः प्रमुदितो धयन्। अ-
(२) हिंसितौ पितरौ मया तत्। तदग्ने अनृणो भवामि।। यदन्तरिक्षं पृथिवीमुत द्यां।
।।२१।। यन्मातरं पितरं वाजिहिंसिम। अग्निर्मा०।। यदाशसा निःशसा यत्पराशसा। यदेन-
श्चकृमा नूतनं यत्पुराणं। अग्निर्मा०।। अतिक्रामामि दुरितं यदेनः। जहामि रिप्रं परमे
सधस्थे। यत्र यन्ति सुकृतो नापि दुष्कृतः। तमारोहामि सुकृतां नु लोकं।। त्रिते
देवा अमृजतैतदेनः। त्रित एतन्मनुष्येषु मामृजे। ततो मा यदि किंचिदानशे। अग्नि-
र्मा०।। दिवि जाता अप्सु जाताः। या जाता ओषधीभ्यः। अथो या अग्निजा आपः।
तानः शुन्धन्तु शुंधनीः।। यदापो नक्तं दुरितं चराम। यद्वा दिवा नूतनं यत्पुराणं।
हिरण्यवर्णास्ततउत्पुनीतनः।। इमं मे० चके।। तत्वायामि० प्रमोषीः।। त्वन्नो
अग्ने० स्मत्।। सत्वंनो० एधि।। त्वमग्ने० भेषजं।। इति च पूतोऽपपत्ति।। ।। ।।३०
(२७)

(२१) आ वो देवास ईमहे सत्यधर्माणो अध्वरे यद्वो देवास आगुरे यज्ञियासो हवामहे।
॥२२॥ इति यजमानः पूर्वया द्वारा प्राग्वंशं प्रविश्य। इन्द्राग्नी द्यावापृथिवी आप
ओषधीः। अपरेणाहवनीयं दक्षिणातिक्रम्य। त्वं दीक्षाणामधिपतिरसीह
मा सन्तं पाहि। आहवनीयमुपोपविश्यास्ते एवात ऊर्ध्वं यजमानस्य संचरो
भवति। यद्दीक्षणीयाया ध्रौवमाज्यं ततो दीक्षाहुतीः स्रुवेण चतस्रो जुहोति।
स्रुचा पञ्चमीम्। यत्राध्वर्युरौद्ग्रहणानि जुहोति तद्यजमानोऽध्वर्युमन्वार-
भ्य पञ्च जुहोति। आकूत्यै प्रयुजेऽग्नये स्वाहा। अध्वर्युर्जुहोति। यजमानः।
वाचा मे वाग्दीक्षतां स्वाहा। आकूत्यै प्रयुजेऽग्नय इदं। वाच इदं। अध्वर्युः
मेधायै मनसेऽग्नये स्वाहा। यजमानः। प्राणेन मे प्राणो दीक्षतां स्वाहा। (२५)

im

११।। मेधायै मनसेऽग्नय इदं । प्राणायेदं । अध्वर्युः । दीक्षायै तपसेऽग्नये स्वाहा ।
(२४) यजमानः । चक्षुषा मे चक्षुर्दीक्षितां स्वाहा । दीक्षायै तपसेऽग्नय इदं ।
।।२३।। चक्षुष इदं । अध्वर्युः । सरस्वत्यै पूष्णेऽग्नये स्वाहा । यजमानः । श्रोत्रेण मे
श्रोत्रं दीक्षतां स्वाहा । सरस्वत्यै पूष्णेऽग्नय इदं । श्रोत्रायेदं । अध्वर्युः ।
पुनर्गृहीत्वा स्रुक्स्रुवयोर्व्यत्यासः । सर्वत्र तूष्णीं ध्रुवामाप्यायनं । आपो
देवीर्बृहती विश्व शंभुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा
वृधातु स्वाहा । यजमानः । मनसा मे मनो दीक्षतां स्वाहा । अद्भ्यो द्यावा-
पृथिवीभ्यामन्तरिक्षाय बृहस्पतय इदं । मनस इदं । अध्वर्युः । अष्टकृत्व आ-
प्याय्य चतुस्तूष्णीं ध्रौवं समापयन् । द्वादशगृहीतेन स्रुचं पूरयित्वा । (२४)
विश्वो देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वो राय इषुध्यसि द्युम्नं वृणीत पुष्यसे ।।१३।।

(२५)

स्वाहा । पूर्णाहुतिं जुहोति । यज० । वातं प्राणं मनसान्वारभामहे प्रजापतिं यो

भुवनस्य गोपाः । स नो मृत्योस्त्रायतां पात्व५ हसो ज्योग्जीवा जरामशी-

महि । पूर्णाहुतिं हूयमानामनुमंत्रयते । कालात्मने सवित्र इदं ॥ अत्र

कृष्णाजिनेन यजमानं दीक्षयत्यध्वर्युस्तस्य दक्षिणं पूर्वपादं प्रतिषीव्येद-

न्तर्वेदि कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमास्तृणाति । यज० । ऋक्सामयोः

शिल्पेस्थः स्ते वामारभे ते मां पात मास्य यज्ञस्योदृचः । शुक्लकृष्णे राजी

आलभते प्रतिदिशं कृष्णाजिनमभिमृशति । इन्द्र शाक्वर गायत्रीं प्रपद्ये

तां ते युनज्मि । इति पुरस्तात् । इन्द्र शाक्वर त्रिष्टुभं प्रपद्ये तां ते युनज्मि ।

दक्षिणतः । इन्द्र शाक्वर जगतीं प्रपद्ये तां ते युनज्मि । पश्चात् । इन्द्र शाक्वरा-

१२॥ -२८) ॥२५॥ तुष्टुभं प्रपद्ये तां त्वै युनज्मि । उत्तरतः । इन्द्र शाक्कर पङ्क्तिं प्रपद्ये तां त्वै युन-
ज्मि । मध्ये । अथ प्राङ्कुरवो जान्वक्नोऽभिसर्पति । इमां धियꣳ शिक्ष-
माणस्य देवक्रतुं दक्षं वरुण सꣳ शिशाधि ययाति विश्वा दुरिता तरेम
सुतर्माणमधि नावꣳ रुहेम । कृष्णाजिनं भसत्त आरोहति । सुत्रामाणं
पृथिवीं द्यामनेहसꣳ सुशर्माणमदितिꣳ सुप्रणीतिं । दैवीं नावꣳ स्वरित्रा-
मनागसमस्रवंतीमारुहेमा स्वस्तये । आरोहन्जपति । इमाꣳ सु नावमारुहꣳ
शतारित्राꣳ शतस्फ्याम् । अच्छिद्रां पारयिष्णुं ॥ आहं दीक्षामरुहमृतस्य
पत्नीं गायत्रेण छन्दसा ब्रह्मणा चर्तꣳ सत्येऽधायि सत्यमृतेऽधाय्यृतं च
मे सत्यं चाभूतां ज्योतिरभूवꣳ सुवरगमꣳ सुवर्गं लोकं नाकस्य पृष्ठे

(२८)
112211

अध्यस्य विष्टपमगमम्। आरूढो जपति। अध्वर्युः। अत्र पत्नी शिरसि कुम्ब-
कुरीरमध्यूहते। जालं कुम्बकुरीरमित्याचक्षते। विष्णोः शर्मासि शर्म यज-
मानस्य शर्म मे यच्छ। अहतेन वाससा दक्षिणमꣳसं यजमानः प्रोर्णुते।
नक्षत्राणां मातीकाशात्पाहि। उष्णीषेण प्रदक्षिणꣳशिरो वेष्टयते। न पुरा-
सोमस्यक्रयादपोर्णवीत। प्राचीनमात्रा वाससा पत्नीं दीक्षयति। ऊर्गस्यां
गिरस्यूर्णम्रदा ऊर्जं मे यच्छ पाहि मा पाप्मनो मा मा हिꣳसीः। मौञ्जीमेख-
ला त्रिवृत्पृथ्व्यन्यतरतः पाशा तया यजमानं दीक्षयति। यज॰। उत्तरेणनाभिं
निष्टर्क्यं ग्रन्थिं कृत्वा प्रदक्षिणं पर्यूह्य दक्षिणेननाभिमवस्थापयति। अत्र
दर्शपूर्णमासवत्पत्नीꣳसंनह्यति संनह्यामीति विकारः। अध्वर्युः। संन्नो

म
।३।। नह्यामि पयसा घृतेन सं त्वा नह्याम्युप ओषधीभिः । संत्वा नह्यामि प्रजया–
२७ ब्रह्मय सा दीक्षिता सनको वाजमस्मे । अपरेण गार्हपत्यमूर्ध्वज्ञुमासीनां
261 पत्नीं योक्त्रेण संनह्यति । उत्तरेण नाभिमित्यादि पत्नी । इन्द्रस्य योनिरसि
मा मा हिंसीः । कृष्णविषाणां यजमानाय प्रयच्छति । आबध्नातीत्येके ।
त्रिवलिः पञ्चवलिर्वा दक्षिणावृद्भवति सव्यावृदित्येके । यज० । कृष्यै त्वा
सु सस्यायै । तयावेदे लोष्टमुद्धन्ति । सुपिप्पलाभ्यस्त्वौषधीभ्यः । अर्थे
प्राप्ते शिरसि कण्डूयते । विषाणे विष्यैतं ग्रन्थिं यदस्य गुल्फितं हृदि
मनो यदस्य गुल्फितम् । इत्यङ्गानि । अध्वर्युः । ऊर्ध्वसदसि वानस्पत्यः
सुद्युम्नो द्युम्नं यजमानाय धेहि । औदुम्बरं दीक्षितदण्डमास्यदद्यात् यजमानाय ।।१३
२८

(२१) अयच्छति। यज०। सूपस्था देवो वनस्पतिरूर्ध्वो मा पाह्योदृचः। प्रतिगृह्य।
॥२८॥ उरुव्यचा असि जनधाः स्वभक्षो मा पाहि। चमसं व्रतप्रदानमभिमंत्र्य। औशि-
नीं दीक्षां जपति। अग्निर्दीक्षितः पृथिवी दीक्षा सा मा दीक्षा दीक्षयतु तया
दीक्षया दीक्षे। वायुर्दीक्षितोऽन्तरिक्षं दीक्षा० दीक्षे। आदित्यो दीक्षितो द्यौ-
र्दीक्षा० दीक्षे। चन्द्रमा दीक्षितः श्रोत्रं दीक्षा० दीक्षे। प्रजापतिर्दीक्षितो मनो
दीक्षा० दीक्षे। वाचा मे वाग्दीक्षतामग्नये समष्ट्वा ३। प्राणेन मे प्राणो
दीक्षतां वायवे समष्ट्वा ३। चक्षुषा मे चक्षुर्दीक्षतां सूर्याय समष्ट्वा
३। श्रोत्रेण मे श्रोत्रं दीक्षतां चन्द्रमसे समष्ट्वा ३। मनसा मे मनो दीक्षतां
प्रजापतये समष्ट्वा ३। भूर्भुवः सुवस्तपो मे दीक्षा सत्यं गृहपतिः।

१७॥ अथैनमध्वर्युरभिमंत्रयते। पृथिवी दीक्षा तयाग्निर्दीक्षया दीक्षितो यथाग्नि-
३४) र्दीक्षया दीक्षितस्तया त्वा दीक्षया दीक्षयामि। अन्तरिक्षं दीक्षा तया
॥२॥दिस वायुर्दीक्षया दीक्षितो यथा वायुर्दीक्षया दीक्षितस्तया त्वा०। द्यौर्दीक्षा तया-
दित्यो दीक्षया दीक्षितो यथादित्यो दीक्षया दीक्षितस्तया त्वा०। दिशो दीक्षा
तया चन्द्रमा दीक्षया दीक्षितो यथा चन्द्रमा दीक्षया दीक्षितस्तया त्वा०।
आपो दीक्षा तया वरुणो राजा दीक्षया दीक्षितो यथा वरुणो राजा
दीक्षया दीक्षितस्तया त्वा०। ओषधयो दीक्षा तया सोमो राजा दीक्षया
दीक्षितो यथा सोमो राजा दीक्षया दीक्षितस्तया त्वा०। वाग्दीक्षा तया
प्राणो दीक्षया दीक्षितो यथा प्राणो दीक्षया दीक्षितस्तया त्वा०। (३०)
॥१७

३४) पृथिवी त्वा दीक्षमाणमनुदीक्षताम् । अन्तरिक्षं त्वा दीक्षमाणमनुदीक्ष-
न्ताम् । द्यौस्त्वा ० । दिशस्त्वा ० दीक्षन्ताम् । आपस्त्वा ० दीक्षन्ताम् ।
ओषधयस्त्वा ० दीक्षन्ताम् । वाक्त्वा ० दीक्षताम् । ऋचस्त्वा ० दीक्षन्ताम् ।
सामानि त्वा ० दीक्षन्ताम् । यजूꣳषि त्वा ० दीक्षन्ताम् । अहश्च रात्रिश्च ।
कृषिश्च वृष्टिश्च । त्विषिश्चापचितिश्चापश्चौषधयश्चोर्क्च सूनृता
च तास्त्वा दीक्षमाणमनुदीक्षन्ताम् ॥ संभारयजूꣳषि चैनमध्वर्युर्वाचयति ।
अग्निर्यजुर्भिरित्यादि अहꣳ श्रद्धयेत्यंतं । अग्निर्यजुर्भिः । सविता स्तोमैः ।
इन्द्र उक्थामदैः । मित्रावरुणावाशिषा । अंगिरसो धिष्णियैरग्निभिः ।
मरुतः सदोहविर्धानाभ्याम् । आपः प्रोक्षणीभिः । ओषधयो बर्हिषा । (२)

१४॥ (२) ॥३२॥ अदितिर्वेद्या। सोमो दीक्षया। त्वष्टेध्मेन। विष्णुर्यज्ञेन। वसव आज्येन। आवे.
आदित्या दक्षिणाभिः। विश्वेदेवा ऊर्जा। पूषा स्वगाकारेण। बृहस्पतिः
पुरोधया। प्रजापतिरुद्गीथेन। अन्तरिक्षं पवित्रेण। वायुः पात्रैः।
अहꣳ श्रद्धया॥ यजमानः। अथांगुलीर्न्यचति। स्वाहा यज्ञं मनसः।
स्वाहा द्यावापृथिवीभ्यां। कनिष्ठिके। स्वाहा दिवः। अनामिके। स्वाहा
पृथिव्याः। मध्यमे। स्वाहोरोरन्तरिक्षात। प्रदेशिन्यौ। स्वाहा यज्ञं वाता-
दारभे। अंगुष्ठाभ्यां मुष्टी करोति वाचं च यच्छति। अध्वर्युः। अथैनं
त्रिरुपाꣳशु आवेदयति त्रिरुच्चैः। अदीक्षिष्टायं ब्राह्मणोऽमुकशर्माऽमुकशर्म-
णः पुत्रोऽमुकशर्मणः पौत्रोऽमुकशर्मणो नप्ता। अमुकदायाः पुत्रोऽमुकदायाः
पौत्रोऽमुकदाया नप्ता॥ यजमानो वाग्यतस्तपस्तप्यमान आस्त आ नक्षत्रस्यो-

* पुत्रः

(३३) देतोः। अध्वर्युः। अधिवृक्षसूर्यकाले। [redacted]
॥३३॥ ेति संप्रेष्यति। उदितेषु नक्षत्रेषु दुग्धे च व्रत-
पयसि। यजमानः। याः पशूनामृषभे वाचस्ताः सूर्यो अग्रे शुक्रो
अग्रे ताः प्रहिण्वो यथाभागं वो अत्र शिवा नस्ताः पुनरायन्तु
वाचः। जपित्वा। व्रतं कृणुतेति वाचं विसृजते। पत्नी च तूष्णीं वाचं
विसृजते। एष्ट्रीः स्थ। चतस्रोऽङ्गुलीरुत्सृजति। द्वे अन्यतरतो द्वे
अन्यतरतो जागर्यैतां रात्रिं क्रीते राजनि द्वितीयां ऽहःसुत्यायां
तृतीयाम्। अध्वर्युः। मध्यरात्रे गार्हपत्ये दीक्षितस्य व्रतं श्रपयति
दक्षिणाग्नौ पत्न्याः। अग्निहोत्रवद्व्रतपात्रे तूष्णीमुन्नीयापरेणाहवनीयं

१८। व्रतमाहत्य प्रयच्छन्नाह । व्रते व्रतयं व्रतमुपैहि । यज०। प्रतिगृह्य नीहार
(६) निधाय । दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाह-
सꣳ सुपारा नो असद्वशे । हस्तावव निज्य । ये देवा मनोजाता मनो
युजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः
स्वाहा । दक्षिणेनाहवनीयं परिश्रिते व्रतयन्ति । नैनम दीक्षिता व्रत-
यन्तं पश्यन्ति । आचम्य । आचमन इदं । शिवाः पीता भवथ यूय-
मापोऽस्माकं योनांवुदरे सुशेवाः । इरावतीरनमीवा अनागसः शिवा
नो भवथ जीवसे । व्रतयित्वा नाभिदेशमभिमृशतेऽपश्यपीता
जपति । तूष्णीं पत्नी स्व आयतने व्रतयन्ति ॥ पूषा सन्या सोमो राधसा । (७)

(३५) सनीहारान्सं शास्ति । चन्द्रमसि मम भोगाय भव । वस्त्रमसि मम
34 भोगाय भव । उस्राऽसि मम भोगाय भव । हयोऽसि मम भोगाय भव । छागोऽ
सि मम भोगाय भव । मेषोऽसि मम भोगाय भव । इत्येतैर्यथालिङ्गं प्रति-
गृह्णाति । देवः सविता वसोर्वसुदावा रास्वेयत्सोमा भूयो भर मा पृण-
न्पूर्त्या वि राधि माहमायुषा । अन्यानि ॥ अध्वर्युः । व्युषिते । [redacted] ति संप्रेष्यति ।
उदित आदित्ये दुग्धे चव्रत पयसि । यज० । याः पशूनामिति जपित्वा व्रतं
कृणुतेति वाचं विसृजते । अध्वर्युब्रह्मयजमानाः पूर्ववत्सोमपरिनेषणं
कुर्वन्ति । [उत्तरवेदिदेश उपरवदेशे वा लोहितं चर्मानडुहं प्राचीनग्रीव- (३७)

सोम

१७॥ मुत्तरलोमास्तीर्य दक्षिणे चर्मपक्षे राजानं निवपति। उत्तरस्मिन्नुपविशति
(२६) सोमविक्रयी। उदकुंभं राजानं सोमविक्रयिणमिति सर्वतः परिश्रित्योत्तरेण
३६ द्वारं कृत्वा विचिन्वन्तः सोमा ३ इत्युक्त्वा। सोमविक्रयिन्सोमं शोधयेत्यु-
क्त्वा पराङावर्तते। अध्वर्युः॥ ततो यजमानः। अहं त्वदस्मि मदसि त्वमे-
तन्ममासि योनिस्तव योनिरस्मि। ममैव सन्वह हव्यान्यग्ने पुत्रः
पित्रे लोककृज्जातवेदः॥ आ जुह्वानः सुप्रतीकः पुरस्तादग्ने स्वां योनि-
मासीद साध्या। अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च
सीदत॥ एताभ्यामाहवनीयमुपतिष्ठते। अध्वर्युः। प्रायणीयायास्तंत्रं प्रायणी
प्रक्रमयति। उत्तरेण गार्हपत्यमित्यादि। नवनीतअवेक्षणं। पौर्णमासं तंत्रं। (२८)
पंचदश सामिधेन्यः। नेध्मसन्नहनं। अलंकृत्य परिस्तरणं। देवा देवेषु। ॥१७॥

कर्मणेवामित्यादि पात्रप्रयोगकाले। स्थाली स्फ्यश्चद्वंद्वं। अग्निहोत्रहवण्यादि।
शम्यादृषदुपल प्रणीतान्वाहार्यस्थालीपिष्टलेपफलीकरणयोश्च वर्जम्।
पवित्रे कृत्वा न ब्रह्मवरणं। ब्रह्मा तूष्णीमतिक्रम्य मंत्रेण निरसनोपवेशने करोति।
अध्वर्युः। यजमानवाचं यच्छ। संविशंतामित्यादि। निर्वपणकाले। अदित्यै
जुष्टं निर्वपामि। अदिते हव्यं रक्षस्व। अदित्यै वो जुष्टं प्रोक्षामि। कृष्णाजि-
नाहननादि हस्तेन तुषोपवपनं। उत्करे त्रिर्निनीय। धृष्ट्यादानादि। ध्रुवोसीति
स्थाल्यासादनं। देवस्त्वा सवितेति पय उत्पूय स्थाल्यामासिंचति। तण्डुलानुप्य
घर्मोसीति स्थाल्यां क्षिपति। अन्तरितं रक्षः। अविदहंत श्रपयत। स्फ्यादानादि।
संप्रैषकाले पत्नीवर्जं संप्रेष्यति। प्रोक्षणीरासादयेध्माबर्हिरुपसादयस्रुवं

१८॥ च स्रुचश्च संमृड्याज्येनो देहि । अग्ने गृहपत इत्यादि । यज॰ । युक्तामे यज्ञ
३८ मन्वासातै । अध्व॰ । प्रकृतिवदाज्यग्रहणं । आप्यायतां घृतयोनि॰ तेज-
सादित्यै जुष्टमभिघारयामि । आर्द्रेभुवनस्येत्युद्वास्य । देवस्त्वा सविते-
त्युत्पूस । सूर्यं ते चक्षुः । वातं प्राणः । द्यां पृष्ठं । अन्तरिक्षमात्मा ।
अङ्गैर्यज्ञं । पृथिवीं शरीरैः ॥ षड्ढोत्रा प्राचुणीयमासादयति । यज्ञो-
स्ययंयज्ञो ममाग्ने चतुर्होतेत्यासन्नाभिमर्शनं । उपभृतमंतत इत्येव-
मंतं कृत्वा । न स्रुचोः सादनं । नाज्यभागो । यजमानः पंचहोतारं वदेत् ।
प्रधानानामुपांशु प्रचारः । आप्यायतां चत्वारि । पथ्यायै स्वस्तये-
अनुब्रूहि । पथ्यां स्वस्तिं यज । पूर्णाहुतिं जुहोति । पथ्यायै स्वस्त्य इदं ।

दर्भिरस्यदब्धो भूयासम्। अग्नये-अनुब्रूहि। अग्निं-यज। दक्षिणार्द्धे
जुहोति। अग्नय इदं। दर्भिरस्यदब्धो भूयासम्। सोमाय-अनुब्रूहि।
सोमं-यज। पश्चार्द्धे जुहोति। सोमायेदं। दर्भिरसि०। सवित्रे-अनुब्रूहि।
सवितारं-यज। उत्तरार्द्धे जुहोति। सवित्र इदं। दर्भिरसि०। जुहामुपस्तीर्य
चरोरवदायाभिघार्य। अदित्यै-अनुब्रूहि। अदितिं-यज। मध्ये। अदित्या
इदं। अदित्या अहं देवयज्यया प्र प्रजया च पशुभिश्च जनिषीय। मरुतो
यद्ध वो दिवः सुम्नायन्तो हवामहे। आतू न उपगंतन॥ मारुतीमृचम-
नूच्य प्रत्याक्रम्य नारिष्टादि। न यजमानभागं। चतुर्धाकरणकाले
त्रेधाकरणं। पथ्यास्वस्त्यादीनां नोज्जितयः। अदित्या अहमुज्जितिमनु-

१५॥ ज्जेषं । संस्राव होमांता प्रायणीया संतिष्ठते । धारयति ध्रौवमाज्यम् । प्राग्वंशे
बर्हिः स्थालीमनिष्कासितां मेक्षणमित्युदयनीयार्थं निदधाति । प्रायणीयाया
ध्रौवाज्यं जुह्वां चतुरो गृह्णाति तूष्णीमाप्यायनं कुर्वन्तास्मिन्दर्भेण हिरण्यं
निष्टर्क्यं बध्वा । इयं ते शुक्र तनूरिदं वर्चस्तया सं भव भ्राजं गच्छ । अवदधा-
ति । पुरस्तात्प्रतीची सोमक्रयण्यवस्थिता भवति । तदाज्यं सोमक्रयणी-
मीक्षमाणो जुहोति । जूरसि धृता मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः
प्रसवे वाचो यन्त्रमशीय स्वाहा । वाचे सोमक्रयण्या इदं । अपरं चतु- ६
र्गृहीतं गृहीत्वा । अनाप्याय्य ध्रौवसमाप्तिः । शुक्रमस्यमृतमसि । हिरण्यं
घृतादुद्धृत्य । वैश्वदेवं हविः । आज्यमवेक्ष्य । सूर्यस्य चक्षुरारुहमग्ने- ७)

॥३०॥

रक्षणः कनीनिकां यदेतञ्जो भिरीयसे भ्राजमानो विपश्चिता । आदित्यमुपस्था-
य । चिदसि मनासि धीरसि दक्षिणासि यज्ञियासि क्षत्रियास्यदितिरस्युभय-
८६५ तः शीर्ष्णी सा नः सुप्राची सुप्रतीची सं भव । प्राङ्मुखी॰ सोमक्रयणीमभि-
38 मंत्रयते । मित्रस्त्वा पदि बध्नातु । दक्षिणं पूर्वपादं प्रेक्षते । पूषाध्वनः पात्विन्द्रा-
याध्यक्षा यानु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा स-
यूथ्यः सा देवि देवमच्छेहीन्द्राय सोमम् । प्राचीं यतीमनुमंत्रयते ।
वस्व्यसि । रुद्रासि । अदितिरसि । आदित्यासि । शुक्रासि । चन्द्रासि ।
षट् पदान्यनुनिक्रामति दक्षिणेन पदा दक्षिणानि । एकमिषे विष्णुस्त्वा-
न्वेतु । द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि व्रताय विष्णुस्त्वान्वेतु । चत्वारि (३९)

गेम

२०॥ मायोभवाय विष्णुस्त्वान्वेतु । पञ्च पशुभ्यो विष्णुस्त्वान्वेतु । षड्रायस्पो-
(२) षाय विष्णुस्त्वान्वेतु । सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वान्वेतु । निक्रम्य-
३९ माणेषु यजमानः सप्तपदान्यनुवर्तयित्वा । सखायः सप्तपदा अभूम
८२ सख्यं ते गमेयꣳ सख्यात्ते मा योषꣳ सख्यान्मे मा योष्ठाः । सप्तमे पदे
जपति । बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिराचिकेतु । सप्तमं पदमध्व-
र्युरञ्जलिनाभिगृह्य पदे हिरण्यं निधाय । पृथिव्यास्त्वा मूर्धन्नाजिघर्मि
देवयजन इडायाः पदे घृतवति स्वाहा । हिरण्ये जुहोति । गाच्छे सोमक्र- ८.२
यण्या इदं । अपादाय हिरण्यं । देवस्य त्वा० माददे । स्फ्यमादाय । परिलि-
खितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपि (२)
॥२०॥

(१,५) कृन्तामि योस्मान्द्वेष्टि यंचवयं द्विष्म इदमस्य ग्रीवा अपि कृन्तामि।
त्रिः प्रदक्षिणं पदं परिलिखति यावद्धूतमनुविसृतं भवति कृष्णविषाणया
चानुपरिलिख्य त्रिः। असमे रायः। स्थाल्यां यावन्मूलं समोप्य। ते रायः।
८३ यजमानाय प्रयच्छति। तोते रायः। यजमानः पत्न्यै प्रयच्छति। माहं
रायस्पोषेण वियौषम। पत्नी पदं प्रतीयमानमनुमंत्रयते। अध्वर्युः। सं देवि
देव्योर्वश्या पश्यस्व। सोमक्रयण्या पत्नीं संख्यापयति। त्वष्टीमती ते
सपेय सुरेता रेतो दधाना वीरं विदेय तव संदृशि। पत्नी सोमक्रयणीमभि-
मंत्रयते। त्वष्टुमन्तस्त्वा सपेम। यजमानोऽनुमंत्रयते। अध्वर्युः। यतः पद-
मपात्तं तस्मिन्सहिरण्यौ पाणी प्रक्षाल्य। उत्तभान पृथिवीं भिंधीदं दिव्यं
नभः। उद्गो दिव्यस्य नो देहीशानो विसृजाद्दृतिं ॥ अद्भिरुपनिनीय। पदं त्रैधं

सोम [illegible] मुत्साह [illegible]
आदित्य मुपतिष्ठते ॥ उत्तर वेदि देश उपरव देशे मायोरिलं चर्मानुदुहं प्राचीन [illegible] सोमत्र
॥२१॥ विभज्य तृतीयमुत्तरतो गार्हपत्यस्य शीते भस्मन्युपवपति । तृतीयमाहवनीयस्य ।
(४६) तृतीयं पत्न्यै प्रयच्छति तत्सा गृहेषु निदधाति ॥ अत्रादित्योपस्थानं राज्ञ-
\+ श्च निवपनादि कर्मैके समामनन्ति । अपि पन्थां मगस्महि स्वस्तिगा-
४४ मनेहसं येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु । अध्वर्युब्रह्मयजमाना
80 उद्धृत पूर्व फलकेनानसा परिश्रितेन छदिष्मता प्राञ्चः सोममच्छ यान्ति ।
उत्तरेण राजानं प्राग्ग्रीवं नद्धयुगं शकटं चुबुकप्रतिष्ठितम् । अंशुना ते
अंशुः पृच्यतां परुषा परुर्गन्धस्ते काममवतु मदाय रसो अच्युतो मात्यो-
सि शुक्रस्ते ग्रहः । यजमानो राजानमभिमंत्रयते । अध्वर्युः । क्षौमं वासो द्विगुणं
त्रिगुणं वा प्राग्दशमुत्तरदशं वा चर्मण्यास्तृणाति । तस्मिन् हिरण्यपाणिर-
ङ्गुष्ठेन कनिष्ठिकया चाङ्गुल्यां शून्संगृह्णान्यचन् । अभित्यं देवं सवितारमू-
सोम विन्नाय [illegible] सोमं [illegible] पराङ्वर्तते । ॥२३॥

(४५)
+

ण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभि प्रियं मतिमूर्ध्वा यस्या
मतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः। अति
४५ छन्दसर्चा मिमीते। एकयैकयोत्सर्गम्। सर्वांस्त्वङ्गुष्ठमुपनिगृह्णाति।
49 अस्मिन् काले ब्रह्मा दक्षिणत आस्ते। एवमङ्गुष्ठेनोपमध्यमया द्वितीयं। अङ्गु-
ष्ठेन मध्यमया तृतीयं। अङ्गुष्ठेन प्रदेशिन्या चतुर्थं। अङ्गुष्ठेनोपमध्यमया
पञ्चमं। पंचकृत्वो यजुषा। पंचकृत्वस्तूष्णीं पूर्ववच्चत्वारि मीत्वाङ्गुष्ठेन
कनिष्ठिकया पंचमं मिमीते। प्रजाभ्यस्त्वा। अवशिष्टानꣳशूनुपसमूह्या-
स्तीर्णेन क्षौमेण वाससोपसंगृह्य। प्राणाय त्वा। द्विगुणेनोष्णीषेणोपनह्य।
व्यानाय त्वा। विस्रस्य। प्रजास्त्वमनु प्राणिहि प्रजास्त्वामनु प्राणन्तु। अवेक्षते।
पुनस्तूष्णीं बध्नाति। एष ते गायत्रो भाग इति मे सोमाय ब्रूतात्। एष ते त्रैष्टु-

॥२२॥ (७६) भो भाग०। एष ते जागतो भाग०। छन्दोमानाᳫं साम्राज्यं गच्छेति मे सोमाय ब्रूतात्।
एतैर्यजमानो राजानमुपतिष्ठते। अध्वर्युः। देव सूर्य सोमं क्रेष्यामस्तं ते प्रब्रूमस्तं त्वं
४६ विश्वेभ्यो देवेभ्यः क्रतून्कल्पय दक्षिणाः कल्पय यथर्तु यथा देवतम्। आदित्यमुप-
82 स्थाय। सोमविक्रयिणे राजानं प्रदाय पणते। सोमविक्रयिन्क्रय्यस्ते सोमाः।
इत्याह। क्रय्यः। इति सोमविक्रयी प्रत्याह। सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं
वीर्यावन्तमभिमातिषाहं। जपिला। गवा ते क्रीणानि। एषा। सोमक्रयणीं नि-
र्दिश्य। तस्या आत्मा तस्या रूपं तस्याः प्रजा तस्याः पयस्तस्या बन्धुः। जपति।
भूयो वा अतः सोमो राजार्हति। सोमविक्रयी प्रत्याह। शुक्रं ते शुक्रेण क्रीणामि चन्द्रं
चन्द्रेणामृतममृतेन सम्यत्ते गोः। जपिला॥ हिरण्येन ते क्रीणानि। इत्याह। भूयो
वा अतः सोमो राजार्हति। सोमविक्रयी प्रत्याह। तपसस्तनूरसि प्रजापतेर्वर्णस्त- (७६)

स्योऽस्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणाम्यस्मे ते बन्धुर्मयि ते रायः
श्रयन्तां । जपित्वा । अजया ते क्रीणानि । भूयो वा अतः ० । धेन्वा ते क्रीणानि ।
भूयो वा अतः ० । वत्सेन ते क्रीणानि । भूयो वा अतः ० । वत्सतरेण षाण्डेन ते
क्रीणानि । भूयो वा अतः ० । अनडुहा ते क्रीणानि । भूयो वा अतः ० ।
मिथुनाभ्यां गोभ्यां ते क्रीणानि । भूयो वा अतः ० । वाससा ते क्रीणानि ।
न भूयः । अस्मे चन्द्राणि । सोमविक्रयिणो हिरण्यमपादत्ते । अस्मे ज्योतिः ।
शुक्लामूर्णास्तुकां यजमानाय प्रयच्छति । तां स काले दशापवित्रस्य
नाभिं कुरुते । कृष्णामूर्णास्तुकामद्भिः क्लेदयित्वा । इदमहं सर्पाणां
दन्दशूकानां ग्रीवा उपग्रथ्नामि । उपग्रथ्य । सोम विक्रयिणि तमः । तया
सोमविक्रयिणं विध्यति । स्वान भ्राजांघारे बम्भारे हस्त सुहस्त

कुत्रोनवेटे वे: सोमक्रयणास्तान्रक्षध्वं मा नो दभन् । सोमक्रयणाननुदिश्य ।
सोमस्त्वा...
॥२५॥

विसृजति । यदि सोमविक्रयी प्रति विवदेत पृषतैनं वरत्राकाण्डेना-
वक्षायं नाशयेयुः । लकुटैर्घ्नन्तीत्येके । नित्यवदेके वधं समामनन्ति ।
उदायुषास्वायुषोदोषधीनां रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृ-
तां अनु । यजमानो राजानमादायोत्थाय । उर्वन्तरिक्षमन्विहि । शक-
टायाभि प्रव्रजति । अध्वर्युः । अदित्याः सदोऽसि । शकटनीडे कृष्णाजिनं
प्राचीनग्रीवमुत्तरलोमास्तीर्य । अदित्याः सद आसीदास्तभ्नाद्यामृषभो
अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि सम्राड्वि-
श्वेत्तानि वरुणस्य व्रतानि । तस्मिन् राजानमासाद्य । वनेषु व्यन्तरिक्षं ततान
वाजमर्वत्सु पयो अघ्नियासु हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सो-

२४॥ ममद्रौ। वाससा पर्याणह्यति। उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय
(५१) सूर्यम्। सोऽर्च्चा कृष्णाजिनं पुरस्तात्प्रत्यानह्यत्यूर्ध्वग्रीवं बहिष्ठाद्विशसनम्।
५० धूरसि॰ धूर्वीमः। दक्षिणां युगधुरमभिमृशति तेनैवोत्तरां। वारुणमसि।
शङ्करमाविद्ध। वरुणस्त्वोत्तभ्नातु। उपस्तभ्य। वरुणस्य स्कंभनमसि
वरुणस्य स्कंभसर्जनमसि। दक्षिणस्यां धुरि शम्यां प्रतिमुच्य तेनैव मंत्रे-
णोत्तरस्यां प्रतिमुच्य। उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्रह्मचोदनौ।
युगपदनड्वाहावुपाज्य। वारुणमसि। योक्त्रपाशं परिहृत्य। प्रत्यस्तो वरुण-
स्य पाशः। अभिधानीं प्रत्यस्यत्येवमुत्तरमनड्वाहं युनक्ति। वारुणमसि।
प्रत्यस्तो वरुणस्य पाशः। हरिणी शाखे बिभ्रत्सुब्रह्मण्योऽन्तरेषेऽवसर्पति
पलाश शाखे शमीशाखे वा। सोमाय राज्ञे क्रीताय प्रोह्यमाणायानुब्रूहि सु- (१०)

(५१) ब्रह्मण्य सुब्रह्मण्यामाह्वय । शङ्करमन्वारभ्य संप्रेष्यति । सासि सुब्रह्मण्ये
तस्यो[redacted]स्ते पृथिवी पादः । सासि सुब्रह्मण्ये तस्यास्तेऽन्तरिक्षं पादः । सासि
सुब्रह्मण्ये तस्यास्ते द्यौः पादः । सासि सुब्रह्मण्ये तस्यास्ते दिशः पादः । परोरजास्ते
५७ पञ्चमः पादः । सा न इषमूर्जं धुक्ष्व तेज इन्द्रियं ब्रह्मवर्चसमन्नाद्यम् । सर्वासु
सुब्रह्मण्यासु सुब्रह्मण्यमन्वारभ्य यजमानो जपत्येवं त्रिराहूतामाहूतो प्रथमा-
यां त्रिरनूक्तायां । प्रच्यवस्व भुवस्पते विश्वान्यभिधामानि मा त्वा परिपरी विद-
न्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो मा गंधर्वो विश्वावसुरा दघत् ।
अध्वर्युब्रह्मयजमानाः प्राञ्चोऽभिप्रयाय प्रदक्षिणमावर्तन्ते । ब्रह्मा दक्षिणत एति ।
श्येनो भूत्वा परा पत यजमानस्य नो गृहे देवैः संस्कृतं यजमानस्य स्वस्त्य-
यन्यसि । अध्वर्यू राजानमभिमंत्रयते । अपि पन्थामगस्महि स्वस्तिगामनेहसं (५१)

२५। येन विप्राः परि द्विषो वृणक्ति विन्दते वसु । अध्वर्युर्यजमानश्च दक्षिणेनोत्तरेण वा
५२) राजानमतिक्रामतः । नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत
५२ दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत । अजेनाग्नीषोमीयेण
कर्णगृहीतेन यजमानो राजानमोप्यमानं प्रतीक्षते । अध्वर्युप्रतिप्रस्थातृनेष्टुने-
तारो राजासन्दीमुद्गृह्णन्त्यग्नीन्प्रज्वलयन्ति । अध्वर्युरग्रेण प्राग्वꣳशमुद-
गीषꣳ शकटमवस्थाप्य । वारुणमसि । शकटमाविध्य । वरुणस्त्वोत्तभ्नातु ।
उपस्तभ्य । वरुणस्य स्कंभनमसि वरुणस्य स्कंभसर्जनमसि । दक्षिणाꣳ शम्या-
मुद्गृह्य । विचृत्तो वरुणस्य पाशः । योक्त्रपाशं विचृत्य । उन्मुक्तो वरुणस्य पाशः ।
अभिधानीमुन्मुच्यास्य विमुक्तः सव्यः ॥ आतिथ्यायास्तन्त्रं प्रक्रमयति । उत्तरेण
गार्हपत्यमित्यादि । बर्हिराहरणकाले आश्ववालः प्रस्तरः । ऐक्षवी विधृती । द्वाविꣳ

१३) शतिद्दारुरिध्मः। कार्ष्मर्यमयाः परिधयः। ततस्त्वां द्वाविंशतिधा संभरामि।
त्रीन्परिधीन्द्वे समिधौ यज्ञायुरनुसंचराम्। वेदं कृत्वा। अलंकृत्य परिस्तीर्य
५२ देवा देवेषु कर्मणे वामित्यादि। न भक्कपालानि स्फ्यश्च द्वंद्वं। प्रणीतान्वाहार्यस्थाली
योक्त्रं वर्ज्यं। न ब्रह्मवरणं। निर्वपणकाले। पत्नी पात्रीमन्वारभते। देवस्य त्वा०
हस्ताभ्यामग्नेरातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामि। प्रथमं। सोमस्यातिथ्य-
मसि०। द्वितीयं। अतिथेरातिथ्यमसि०। तृतीयं। अग्नये त्वा रायस्पोषदाव्ने
विष्णवे०। चतुर्थं। श्येनाय त्वा सोमभृते विष्णवे०। पंचमं। तूष्णीं षष्ठं। अन्वा-
वापः सप्तमः। इदं देवानामित्यादि। विष्णो हव्यं रक्षस्व। विष्णवे वो जुष्टं प्रो-
क्षामि। हविष्कृदेहि। वाचं विसृज्य। वरुणस्य स्कंभनमसि वरुणस्य स्कंभसर्ज-
नमसि। उत्तरां शम्यामुद्वृह्य। विचृत्तो वरुणस्य पाशः। योक्त्रपाशं विचृत्य। (१२)

२६॥ उन्मुक्तो वरुणस्य पाशः। अभिधानीमुन्मुञ्चति। वारुणमसि। परिश्रयणवासोऽ
(५४) पादाय। वरुणोऽसि धृतव्रतः। राजानमादाय। अच्छिन्नपत्त्रः प्रजा उपावरोहो-
५८ शन्नुशतीः स्योनः स्योनाः सोम राजन्विश्वास्त्वं प्रजा उपावरोह विश्वास्त्वां प्रजा
५१ उपावरोहन्तु। उपावहृत्य। उर्वन्तरिक्षमन्विहि। अभिप्रव्रजति। आसन्दीमा-
दाय प्रतिप्रस्थाता पूर्वः प्रतिपद्यते। अध्वर्युः। या ते धामानि हविषा यजन्ति
ता ते विश्वा परिभूरस्तु यज्ञं गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा
सोम दुर्यान्। पूर्वया द्वारा प्राग्वꣳशं प्रविश्यापरेणाहवनीयꣳ राजानं दक्षि-
णातिहरति। पूर्वेणाहवनीयं प्रतिप्रस्थाता राजासन्दीꣳ हरति। अध्वर्युः।
वरुणस्यर्तसदन्यासि। दक्षिणेनाहवनीयꣳ राजासंदीं प्रतिष्ठाप्य। अदित्याः
सदोऽसि। तस्याꣳ शकटवत् कृष्णाजिनमास्तृणाति। अदित्याः सद आसीद। (५४)

६)
तस्मिन् राजानमासाद्य। वरुणोऽसि धृतव्रतः। राजानमभिमंत्रयते। वारुणमसि
शंयोर्देवानां सख्यान्मा देवानामपसेश्छित्स्महि। वाससापर्यानह्यति।
अग्निं राजानं चान्तरेण मा संचारिष्ट। इति संप्रेष्यति। अवरक्षो दिव
५५ इत्यादि अवहननादि कर्म प्रतिपद्यते। विष्णवे जुष्टमधिवपामि। कपालानामु-
पधानकाले। अष्टावुपधाय चितस्थेति नवममुपदधाति। विष्णवे जुष्टं संवप-
मि। अन्या आपो यजुषोत्पूय। समापो अद्भिरग्मत। संप्रैषकाले पत्नीवर्जं
संप्रेष्यति। दिवः शिल्पमवततं। अग्नेगृहपतइत्यादि। चतुर्गृहीतान्याज्यानि पंचा-
वत्तीनामपि। तेजसा विष्णवे जुष्टमभिघारयामि। पृथिवीहोतेति चतुर्होत्रातिथ्य-
मासाद्य। यज्ञोस्ययंयज्ञो ममाग्ने चतुर्होता। अग्निर्यजुर्भिरित्यादि संभारयजूंषि
षि व्याचष्टे। पशुनन्निर्मन्थ्यः सामिधेन्यश्च। अग्नेर्जनित्रमसीत्यादि अग्निहोमांतं।
गधान

२७॥ वेदं निधायेत्यादि । पंच प्रयाजाः । इडांतमिश्चौपभृतं सर्वमानयति नोपभृतमभिघा-
(५६) रयति । उपांशु प्रधानयागः । विष्णवे-अनुब्रूहि । विष्णुं-यज । विष्णव इदं ।
विष्णोरहं देवयज्ययान्नादो भूयासम् । न यजमानभागं । इडामार्जनांता संतिष्ठते ॥
५६ धारयति ध्रौवमाज्यम् । गार्हपत्ये दीक्षितस्य व्रतं श्रपयतीत्यादि नाभ्यभिमर्श-
॥५३॥ नांतं पूर्ववत् । आतिथ्याया ध्रौवात्स्रुचि चमसे वा तानूनप्त्रं समवद्यति । तानूनप्त्र
आपतये त्वा गृह्णामि । प्राणायेदं । परिपतये त्वा गृह्णामि । मनस इदं । तनूनप्त्रे
त्वा गृह्णामि । अग्नय इदं । शाक्वराय त्वा गृह्णामि । शक्त्या इदं । शक्मन्नोजिष्ठाय
त्वा गृह्णामि । जीवात्मन इदं । तूष्णीं सकृदाप्याय्य ध्रौवसमाप्तिः । यजमानः ।
अनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरंजसा सत्यमुपगेषं सुवि-
ते मा धाः । तानूनप्त्रमभिमृशति । अनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा
अनभिशस्तेन्यं । ऋत्विजः सर्वे युगपत्स्पृशंति । प्रजापतौ त्वा मनसि जुहोमि । (५६) ॥२७॥

६) यजमानस्तानूनप्त्रं त्रिरवजिघ्रति । प्रजापतयइदं । अध्वर्युः । अग्नीन्मदन्त्यापाः ।
७ इति पृच्छति । मदन्ति देवीरमृता ऋतावृधः । आग्नीध्रः प्रत्याह । अध्वर्युः । ताभिरेहि ।
इति संप्रेष्यति । एना वंदस्व वरुणं बृहंतं नमस्याधीरममृतस्य गोपां । सनः शर्म
॥ त्रिवरूथं वियंसत्पातं मो द्यावापृथिवी उपस्थे । राजानं गच्छति । सर्वत्र
मदन्तीरुपस्पृश्य तानूनप्त्रिणो विस्रस्य राजानं । अंशुरंशुस्ते देवसोमाप्या-
यतामिन्द्रायैकधनविद आतुभ्यमिन्द्रः प्यायतामात्वमिन्द्राय प्यायस्वाप्या-
यय सखीन्त्सन्या मेधया स्वस्ति ते देवसोम सुत्यामशीय । स हिरण्यैः
पाणिभिराप्याययन्ति । अथ निन्हुवते दक्षिणे वेद्यन्ते प्रस्तरं निधाय
दक्षिणान्पाणीनुत्तानान्कृत्वा सव्यान्नीच्यः । एष्टा रायः प्रेषे भगायऋतमृत
वादिभ्यो नमो दिवे नमः पृथिव्यै ॥ अथ यजमानोऽवान्तरदीक्षामुपैति । अग्ने (५६)

१म

॥ व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूरेषा सा त्वयि या अवान्तर
५७ तव तनूरियꣳ सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानि। आहव- दीक्षा
नीयमुपतिष्ठते। संततरां मेखलाꣳ समायच्छते। संततरां मुष्टी करोति।
५८ तप्तव्रतो भवति। यातेअग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा।
मदन्तीभिर्मार्जयते। एतेनैवात ऊर्ध्वं व्रतयति। प्रवर्ग्येण प्रचर्योपसदा
५५ चरन्ति ॥ इति प्रथमः प्रश्नः ॥ ॥ अथ प्रवर्ग्य संभरणम् ॥ युञ्जते मन
उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुना
विदेक इन्मही देवस्य सवितुः परिष्टुतिः। काष्टकीं समिधमाधाय। देवस्य
त्वा० माददे। वैणवीमभ्रिमादाय। अभ्रिरसि नारिरसि। अध्वरकृद्देवेभ्यः।
अभिमंत्रयते। उत्तिष्ठ ब्रह्मणस्पते। देवयन्तस्त्वेमहे। ब्रह्माणमामंत्रयते। उपो-

८॥ व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूरेषा सा त्वयि या अवान्तर दीक्षा
३९) तव तनूरियं० सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानि। आहव-
नीयमुपतिष्ठते। संतरां मेखलां० समायच्छते। संतरां मुष्टी कुरुते।
५८ तप्तव्रतो भवति। यातेअग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा।
मदन्तीभिर्मार्जयते। एतेनैवात ऊर्ध्वं व्रतयति। प्रवर्ग्येण प्रचर्योपसदा
चरन्ति॥ इति प्रथमः प्रश्नः॥ ॥ अथ प्रवर्ग्य संभरणम्॥ युञ्जते मन
उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुना
विदेक इन्मही देवस्य सवितुः परिष्टुतिः। काण्टकीं समिधमाधाय। देवस्य
त्वा० माददे। वैणवीमभ्रिमादाय। अभ्रिरसि नारिरसि। अध्वरकृ देवेभ्यः।
अभिमंत्रयते। उत्तिष्ठ ब्रह्मणस्पते। देवयन्तस्त्वेमहे। ब्रह्माणमामंत्रयते। उपो- (५९)

१ मृत्वनः। पूर्वः पूर्व इतरः। उत्तरेण। ८
तिष्ठति ब्रह्मा। उप प्रयन्तु मरुतः सुदानवः। इन्द्र प्राशूर्भवा सचा। उभावुत्तर-
मर्धर्चं जपतः। आस्यते कृष्णाजिनम्। अनुनयन्त्यजां पुं श्छगलाम श्वं वृषा-
णमिति। प्रैतु ब्रह्मणस्पतिः। प्र देव्येतु सूनृता। अच्छा वीरं नर्यं पङ्क्तिराधसं।
देवा यज्ञं नयन्तु नः। प्राञ्चो प्रथमा अभिप्रव्रजन्ति अध्वर्युब्रह्मयजमानाः।
अग्रेणाहवनीयं मृत्वनं कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमास्तीर्य। देवी
द्यावापृथिवी अनुमेमं साथां। मृत्वनमभिमंत्रयते। ऋध्यासमद्य।
मृत्वनेऽभ्रिया महत्सापउपस्पृश्य। मखस्य शिरः। अपाहाय। मखाय त्वा।
हरति। मखस्य त्वा शीर्ष्णे। कृष्णाजिने निवपति। एवं द्वितीयं तृतीयं च
हरति। ऋध्यासमद्येत्यादि। तूष्णीं चतुर्थं। एवमितरान्संभारान्। अभि-

अनग्न संभरण

मंत्रणे विकारः। इयत्यग्र आसीः। वराहविहतमभिमंत्रयते। ऊध्यासंमुधेत्यादि
तूष्णीं चतुर्थमित्यंतं पूर्ववत्। देवीर्वम्रीरस्य भूतस्य प्रथमजा ऋतावरीः।
५६ वल्मीकवपामभिमंत्रयते। ऊध्यासंमुधेत्यादि पूर्ववत्। इन्द्रस्यौजोऽसि।
पूतीकानभिमंत्रयते। ऊध्यासंमुधेत्यादि पूर्ववत्। अजलोमानि कृष्णाजिन-
लोमानि च संसृज्य। अग्नेर्जा असि प्रजापते रेतः। अभिमंत्रयते। ऊध्या-
संमुधेत्यादि पूर्ववत्। आयुर्धेहि प्राणं धेहि। अपानं धेहि व्यानं धेहि। चक्षु-
र्धेहि श्रोत्रं धेहि। मनो धेहि वाचं धेहि। आत्मानं धेहि प्रतिष्ठां धेहि। मां
धेहि मयि धेहि। अश्वेनावघ्राप्य। मधु त्वा मधुला करोतु। अजयाभिदोहति।
बहव आर्याः परिगृह्य हरन्ति। उत्तरेण विहारमुद्धतेऽवोक्षिते सिकतोपोप्ते
निदधाति। मधु त्वा मधुला करोतु। मरुत्तीरुपसृजति। यत्किंच प्रत्यर्थ्यस्क-

कृत्वा मदन्तीभिरेव ताः क्रियते । नैनं स्त्री प्रेक्षते न शूद्रः । संग्र-
कृत्वा मदन्तीभिरेव ता क्रियते । नैनᳵ स्त्री प्रेक्षते न शूद्रः । संप्र-
कृत्यं मदन्तीभिरेव । मखस्य शिरोऽसि । पिण्डं कृत्वा । यज्ञस्य पदे स्थः । अंगुष्ठाभ्यां
निरस्यापहाय मुखमनभिप्राणन्वेणुना महावीरं करोति । त्र्युद्धिं
पञ्चोद्धिमपरिमितोद्धिं वा प्रादेशमात्रमूर्ध्वसानुमुपरिष्टादासेचनवन्तं
मध्ये संनतं वायव्य प्रकारम् । गायत्रेण त्वा छन्दसा करोमि । प्रथमम् ।
78 मखस्य रास्नाऽसि । उपबिलं रास्नां करोति । अदितिस्ते बिलं गृह्णातु
पाङ्क्तेन छन्दसा । वेणु पर्वणा बिलं करोति । सूर्यस्य हरसा श्राय । उत्त-
रतः सिकतासु प्रतिष्ठाप्य । मखोऽसि । अनुवीक्षते । एवं द्वितीयं तृतीयं
च करोति । मखस्य शिरोऽसीत्यादि । त्रैष्टुभेन त्वा छन्दसा करोमि ।
द्वितीयम् । मखस्य रास्नासीत्यादि अनुवीक्षत इत्यन्तं पूर्ववत् । मखस्य
... राजन्या । उद्धास्य ।

शिरो ऽसोसादि । आगतेन त्वा छन्दसा करोमि । तृतीयं । मखस्य रास्ना-
सीत्यादि अनुवीक्षत इत्यंतं पूर्ववत् । तूष्णीमितराणि । एतस्या एव
मृदो दोग्ध्रे करोति हस्त्योष्ठे प्रसेचनवती यथा स्रुगदण्डेनम् ।
५९ आज्यस्थालीं दधिस्थालीं रौहिणकपाले च परिमण्डले घोट
प्रकारे करोति । श्लक्ष्णीकरणैः श्लक्ष्णी कुर्वन्ति । अहतञ्चण्डा-
तकैर्गौनीधुकैः क्षीतकाभिर्वेणुपर्वभिराज्येनेति । वृष्णो ऽश्वस्य
शकृत् । गार्हपत्ये प्रदीप्य प्रथमकृतं महावीरं शफाभ्यां
परिगृह्य धूपयति । वृष्णो अश्वस्य निष्पदसि । वरुणस्त्वा
धृतव्रतो आधूपयतु । मित्रावरुणयोर्ध्रुवेण धर्मणा । एवं द्वितीयं
तृतीयं च धूपयति । तूष्णीमितराणि । शफाभ्यामेवात ऊर्ध्वं

महावीरानादत्ते । अग्रेण गार्हपत्यमवटं खात्वा लोहितपचनीयैः
संभारैरवस्तीर्य तेषु महावीरानुपावहरति । अर्चिरसि । प्रथमं ।
शोचिरसि । द्वितीयं । ज्योतिरसि तपोऽसि । तृतीयं । तूष्णीमित-
राण्यन्ववधाय लोहितपचनीयैः संभारैः प्रच्छाद्य गार्हपत्ये
मुञ्जानादीप्योपोषति । अर्चिषे त्वा । पुरस्तात् । शोचिषे त्वा ।
दक्षिणतः । ज्योतिषे त्वा । पश्चात् । तपसे त्वा । उत्तरतः । अभी-
मं महिना दिवं मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीं । पच्य-
मानान्मैत्र्योपचरति । पक्वेषु । सिद्ध्यै त्वा । द्विः धृष्टी आदाय
भस्मापोह्य प्रथमकृतं महावीरꣳ शफाभ्यां परिगृह्य । देवस्त्वा
सवितोद्वपतु सुपाणिः स्वङ्गुरिः । सुबाहुरुत शक्त्या । उद्वास्य ।

तीम

३९।। अपेद्यमानः पृथिव्यां । आशा दिश आ पृण । उत्तिष्ठ बृहन्भव । ऊर्ध्व- प्रवर्ग्य संभर
स्तिष्ठ ध्रुवस्त्वं । उत्तरतः सिकतासु प्रतिष्ठाप्य । सूर्यस्य त्वा चक्षु-
षान्वीक्षे । ऋजवे त्वा । साधवे त्वा । सुक्षित्यै त्वा भूत्यै त्वा । अनु-
६९ वीक्षते । एवं द्वितीयं तृतीयं चोद्वासयति । देवस्त्वा सवितेत्या-
द्यनुवीक्षणांतं । तूष्णीमितराण्युद्वास्य । इदमहं अमुकशर्माणं गोत्रं
श्रिया पशुभिर्ब्रह्मवर्चसेन पर्यूहामि । एतान्प्रदक्षिणं सिकताभिः
पर्यूह्य । अथैनानभिपूतेनाजापयसा छृणत्ति । गायत्रेण त्वा छन्दसा
त्वा छृणद्मि छृणत्तु त्वा वाक् छृन्धि वाचं । प्रथमं । त्रैष्टुभेन त्वा छन्दसा
छृणद्मि छृणत्तु त्वोर्क् छृन्ध्यूर्जं । द्वितीयं । जागतेन त्वा छन्दसा छृण-
द्मि छृणत्तु त्वा हविः छृन्धि हविः । तृतीयं । तूष्णीमितराणि । अथै-

113:

नान्कृष्णाजिन उपनह्य सजति । देवेपुरश्चर सघ्यासं त्वा ॥ ६१ ॥ [redacted]
प्रचरिष्यन्तः संवृण्वन्ति द्वाराणि । परिश्रयन्ति पत्न्याः । पश्चाद्धोतोप-
[redacted] । पुरस्तादध्वर्युः । दक्षिणतो ब्रह्मा यजमानः प्रस्तोता च । उत्त-
६२ रतः प्रति प्रस्थाता ग्नीध्रश्च । महन्तीरुपस्पृशन्त्य ॥ नमो वाचे या चोदि-
ता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम
ऋषिभ्यो मंत्रकृद्भ्यो मंत्रपतिभ्यो मा मामृषयो मंत्रकृतो मंत्रपतयः
परां दुर्मामृषीन्मंत्रकृतो मंत्रपतीन्परादां वैश्वदेवीं वाचमुद्यासं
शिवामदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं
जगत् । शर्म चंद्रश्च सूर्यश्च शर्म ब्रह्म प्रजापती । भूतं वदिष्ये भुवनं
वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं ॥३:

वदिष्ये तस्मा अहमिदमुपस्तरणमुपस्तृण उपस्तरणं मे प्रजायै पशूनां
भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मा पातं
प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु-
वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं
मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु । ॐ शांतिः शांतिः शांतिः ॥
अथमातुनाकेन शांतिं कृत्वाग्रेण गार्हपत्यं दर्भान्सꣳस्तीर्य तेषु महा-
वीरानुपावहरति । देवंपुरश्चर सघ्यासंत्वा । अत्रैव सर्वं परिधर्म्यम् ।
अथौदुम्बराणि । सम्राडासन्दीं नितराम् । राजासन्ध्या वर्षीयसीमेके
समामनन्ति । मौञ्जीभी रज्जुभिरेकसराभिर्व्युताम् । चतस्रः स्रुचः ।
द्वे अनिष्टुब्धे । निष्टुब्धयोर्वर्षीयस्युपयमनी प्रोक्षणीधान्याः । स्रुवौ

शफौ महावीरसंमितावभ्रयौ धृष्टी मेथीं मयूखान्षट् शकलान्का-
ष्मर्यीं च समिधं त्रयोदश वैकङ्कतान्परिधीन्वैकङ्कतानि घर्मेन्धनानि।
६७ त्रीणि कार्ष्णाजिनानि पवित्राणि शुक्लकृष्णलोमानि। तेषां वैणवा दण्डा
बाहुमात्रा भवन्तीति विज्ञायते। द्वौ रुक्मौ रजतसुवर्णौ शतमानौ
६४ भवतः। अथ मौञ्जानि। वेदौ तयोरन्यतरः परिवासितः। अभिधानी
निदाने त्रीणि विशाखदामानि अभूलान्मुञ्जप्रलवान्। रौहिणयोः
पिष्टान्यफलीकृतानाम्। खरेभ्यः सिकताः। तूष्णीं पवित्रे कृत्वा प्रोक्षण-
१ पात्रे निधाय मदन्तीरानीय तूष्णीमुत्पूयाभिमंत्र्य। ब्रह्मन्प्रवर्ग्येण
प्रचरिष्यामो होतर्घर्ममभिष्टुहि अग्नी रौहिणौ पुरोडाशावधिश्रय प्रतिप्रस्था
तर्विहर प्रस्तोतः सामानि गाय। ब्रह्मा। यजुर्युक्तं सामभिराक्तं खं=

त्वा । विश्वैर्देवैरनुमतं मरुद्भिः । दक्षिणाभिः प्रततं पारयिष्णुं । स्तुभो
वहो वहन्तु सुमनस्यमानं । सनो रुचं धेह्यहृणीयमानः । भूर्भुवः सुवः ।
उपांशूक्त्वा । ओमिन्द्रवन्तः प्रचरत । उच्चैरनुजानाति । यमाय
त्वा मखाय त्वा । सूर्यस्य हरसे त्वा । सर्वं परिचर्यमनुपूर्वं त्रिः प्रो-
क्षति सकृन्मंत्रेण द्विस्तूष्णीम् । प्रोक्षितानि व्याघातयति विशकलि-
तानि करोति । आग्नीध्रो रौहिणौ पुरोडाशौ तूष्णीमुपचरितौ
६५ अत्र धृष्टयादानादि भस्माध्यूहनपर्यंतं पात्रपाण्यां संवापः । अत्र
अपरेणा-
ग्निमाज्यस्थाल्या द्विर्विलोमसंस्कारेणाज्यं संस्करोति । अपरेणा- ६८
गार्हपत्ये
ग्निमाज्यस्थाल्यामित्यादि पवित्रानुप्रहरणांतं करोति । गार्हपत्ये
दध्यधिश्रयति । अध्वर्युः । अथैतां सम्राडासन्दीमादायाग्रेणाहव-

नीयं पर्याहृत्य पुरस्तात्प्राजापसन्ध्याः सादयति । तस्यां कृष्णाजिनं
प्राचीनग्रीवमुत्तरलोमास्तीर्य तस्मिन्नप्रचरणीयो महावीरानुपावहरति ।
देवं पुरश्चर सघ्यासं त्वा । अथैतां मेथीं मयूखान्विशाखदामानीत्या-
दायाग्रेण होतारं जघनेन गार्हपत्यं दक्षिणया द्वारोपनिर्हृत्य दक्षिणेन
दक्षिणं द्वारं मेथीं निहन्ति होतुः समीक्षायै । एतस्यैव द्वारस्य पूर्वस्यै
६६ द्वार्यायै दक्षिणतो नलसाय शंकुम् । एतस्यैवापरस्यै द्वार्यायै दक्षिणतोऽ
जाया अभ्यन्तरम् । उत्तरतो बर्कराय । तेषु विशाखदामानि व्याया-
तयति । तान्येव व्यायातितानि भवन्त्योद्वासनात् । तैरेनान्काले
बध्नन्ति । ततः खरानुपवपति । उत्तरेण गार्हपत्यमेकम् । उत्तरेणा-
हवनीयमेकम् । उत्तरपूर्वं द्वारं प्रत्युच्छिष्टखरं करोति बाह्यतो निःषेच-
नवन्तम् । उत्तरेणाहवनीयं शृतदध्यासादयति । शकलान्काष्टकीं

च समिधं । अथैतं प्रचरणीयं महावीरं उपकाभ्यां परिगृह्याप्रच्छिन्नाग्रेण
वेदेनोपरिष्टात्संमार्ष्टि । देवं पुरश्चर सघ्यासं त्वा । प्राणाय[१] स्वाहा । प्राणा-
३६ येदं । व्यानाय[२] स्वाहा । व्यानायेदं । अपानाय[३] स्वाहा । अपानायेदं । चक्षुषे
स्वाहा । चक्षुष इदं । श्रोत्राय[५] स्वाहा । श्रोत्रायेदं । मनसे[६] स्वाहा । मनस इदं ।
वाचे सरस्वत्यै[७] स्वाहा । वाचे सरस्वत्या इदं । दक्षाय[८] स्वाहा । दक्षायेदं ।
क्रतवे[९] स्वाहा । क्रतव इदं । ओजसे[१०] स्वाहा । ओजस इदं । बलाय[११] स्वाहा ।
बलायेदं । स्रुवेणाहवनीये सप्तैकादशाज्याहुतीर्हुत्वा । देवस्त्वा सविता
मध्वानक्तु । समंजन स्रुवेणोपर्याहवनीये महावीरमक्त्वा । पृथिवीं
तपसस्त्रायस्व । अपरास्मिन्खरे राजतं रुक्मं निधाय खरसमीपे
महावीरं प्रतिष्ठाप्य दयान्मुञ्जप्रलवानादाय दक्षिणेषामग्राणि । आर्च-

वैत्वा । गार्हपत्ये प्रदीपयति । तेषामग्रैरुत्तरेषां मूलानि । शोचिषे त्वा ।
प्रदीपयति । तेषां मूलैर्दक्षिणेषां मूलानि । ज्योतिषे त्वा । प्रदीपयति ।
६८ तेषां मूलैरुत्तरेषामग्राणि । तपसे त्वा । प्रदीपयति । तान्व्यत्यस्तान् ।
अर्चिरसि शोचिरसि ज्योतिरसि तपोऽसि । उपरि रुक्मे निदधाति ।
सꣳसीदस्व महाꣳ असि शोचस्व देववीतमः । विधूममग्ने अरुषं मियेध्य
सृज प्रशस्त दर्शतं । तेषु महावीरं प्रतिष्ठापयति । अञ्जन्ति यं प्रथयन्-
तो न विप्राः । वपावन्तं नाग्निना तपन्तः । पितुर्न पुत्र उपसि प्रेष्ठः ।
आ घर्मो अग्निमृतयन्न सादीत् । आज्येनाभिपूरयति । अध्यधिमहा-
वीरमसꣳस्पृशन्यजमानः प्राञ्चं प्रादेशं धारयमाणो जपति । अना-
धृष्या पुरस्तात् । अग्नेराधिपत्ये । आयुर्मेदाः । पुरस्तात् । पुत्रवती दक्षि-

ाम

३८१।

णतः। इन्द्रस्याधिपत्ये। प्रजां मे दाः। दक्षिणतः। सुषदा पश्चात्। देवस्य सवितु- प्रन्नः
राधिपत्ये। प्राणं मे दाः। पश्चात्। आश्रुतिरुत्तरतः। मित्रावरुणयोराधिपत्ये।
श्रोत्रं मे दाः। उत्तरतः। विधृतिरुपरिष्टात्। बृहस्पतेराधिपत्ये। ब्रह्म मे दाः।
६९ क्षत्रं मे दाः। तेजो मे धा वर्चो मे धाः। यशो मे धास्तपो मे धाः। मनो मे धाः।
इत्युपरिष्टात्। मनोरश्वासि भूरिपुत्रा। विश्वाभ्यो मा नाष्ट्राभ्यः पाहि।
सूपसदा मे भूया मा मा हिँसीः। उत्तरतः पृथिवीमभिमृशति। अध्वर्युः प्रति-
प्रस्थाता च। सिद्ध्यै त्वा। दिवः धृष्टी आदत्तः। तपोष्वग्ने अन्तराँ
अमित्रान्। तपा शँसमररुषः परस्य। तपा वसो चिकितानो अ-
चित्तान्। वि ते तिष्ठन्तामजरा अयासः। गार्हपत्यादुदीचोऽङ्गारान्निरूह।
चितः स्थ परिचितः स्वाहा मरुद्भिः परिश्रयस्व। प्रदक्षिणमङ्गारैः पर्यूह।

वैकङ्कतैः परिधिभिः परिधत्तः । मा असि । मा असि । प्राञ्चावध्वर्युर्निद-
धाति । प्रमा असि । प्रमा असि । उदञ्चौ प्रतिप्रस्थाता । प्रतिमा असि ।
इति पूर्ववदध्वर्युः । संमा असि । इति पूर्ववत् प्रतिप्रस्थाता । विमा
60 असीति पूर्ववदध्वर्युः । उन्मा असीति पूर्ववत् प्रतिप्रस्थाता । अन्तरिक्ष-
स्यान्तर्धिरसि । अध्वर्युरेव दक्षिणतस्तयोदञ्चं निदधाति । दिवं तपस-
स्त्रायस्व । सौवर्णेन रुक्मेणापिधाय । आभिर्गीर्भिर्यदतो न ऊनं ।
आप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि । भूयिष्ठ
भाजो अधते स्याम ॥ शुक्रं ते अन्यद्यजतं ते अन्यत् । विषुरूपे अहनी
द्यौरिवासि । विश्वा हि माया अवसि स्वधावः । भद्रा ते पूषन्निह रातिरस्तु ॥
अर्हन्बिभर्षि सायकानि धन्व । अर्हन्निष्कं यजतं विश्वरूपं । अर्हन्निदं
दयसे विश्वमभ्वं । न वा ओजीयो रुद्र त्वदस्ति ॥ इति तिसृभिरभिमन्त्र्य ।

१॥ धनित्राण्यादत्ते । गायत्रमसि । प्रथमं । त्रैष्टुभमसि । द्वितीयं । जागतमसि ।
तृतीयं । तैरेनं त्रिरूर्ध्वमुपवाजयति । मधु मधु मधु । तेषामेकं प्रतिप्रस्थात्रे
प्रयच्छति । एकमाग्नीध्राय । आग्नीध्रप्रथमास्त्रिः प्रदक्षिणमूर्ध्वं धून्वन्तः
परियन्ति । तमभिमुखाः पर्युपविशन्ति । पुरस्तादध्वर्युः । दक्षिणतः प्रति-
६१ प्रस्थाता । उत्तरत आग्नीध्रः । अव्यतिषङ्गमूर्ध्वं धून्वन्तः हेतुः प्रणवैः
संराधयन्त इन्धानाः समञ्जन्तो वाग्यता आसते । प्रज्वलिते रुक्म-
मपादत्त इति विज्ञायते । यत्राभिजानाति याभिर्वर्तिकां ग्रसिताममुञ्चत-
मिति, तदध्वर्युर्महावीरमभिमन्त्रयते । दिवा प्राची दिवो भासि दक्षिणा । दिवा
प्रतीची दिवो भास्युदीची । दिवोर्ध्वो भासि सुमनस्यमानः । स नो रुचं धेह्य-
हृणीयमानः । अग्निष्ट्वा वसुभिः पुरस्ताद्रोचयतु गायत्रेण छन्दसा । स मा
रुचितो रोचय । इन्द्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु त्रैष्टुभेन छन्दसा । स मा० । ॥३६

62 वरुणस्त्वादित्यैः पश्चाद्रोचयतु जागतेन छन्दसा । सम्रा० । द्युतानस्त्वा मारुतो
मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसा । सम्रा० । बृहस्पतिस्त्वा विश्वै-
र्देवैरुपरिष्टाद्रोचयतु पाङ्क्तेन छन्दसा । सम्रा० । रोचितस्त्वं देव घर्म देवे-
ष्वसि । रोचिषीयाहं मनुष्येषु । सम्राड् घर्म रुचितस्त्वं देवेष्वायुष्मां-
स्तेजस्वी ब्रह्मवर्चस्यसि । रुचितोऽहं मनुष्येष्वायुष्मांस्तेजस्वी
ब्रह्मवर्चसी भूयासं । रुगसि । रुचं मयि धेहि । मयि रुक् । दश पुरस्ता-
द्रोचसे । दश दक्षिणा । दश प्रत्यङ् । दशोदङ् । दशोर्ध्वो भासि सुमनस्यमानः ।
स नः सम्राडिषमूर्जं धेहि । वाजी वाजिने पवस्व । रोचितो घर्मो रुचीय ॥
यत्राभिजानात्यप्नस्वती मश्विना वाचमस्मे इति तदुपोत्तिष्ठन्नध्वर्युराह ।
रुचितो घर्मः । इति । अध्वर्यु प्रथमा अनभिधून्वन्तोऽग्निः प्रतिपरियन्ति ।

धवित्राण्यादायाध्वर्युः प्रतिप्रस्थात्रे प्रयच्छति । तानि प्रतिप्रस्थाताग्रेणाहवनीयं
पर्याहृत्य सम्राडासन्द्या॑ सादयति । यथास्थोऽक्रमवस्थाय सर्वऋत्विजो यजमान-
श्चाधीयन्तो महावीरमवेक्षन्ते ॥ अपश्यं गोपामनिपद्यमानं । आ च परा च पथि-
भिश्चरन्तं । स सध्रीचीः स विषूचीर्वसानः । आवरीवर्त्ति भुवनेष्वन्तः । अत्र
प्रावीः । मधुमाध्वीभ्यां मधुमाधूचीभ्यां । अनु वां देववीतये । समग्निरग्निना-
गत । सं दैवेन सवित्रा । स॑ सूर्येण रोचते । स्वाहा समग्निस्तपसागत । सं
दैव्येन सवित्रा । स॑ सूर्येणारोचिष्ट । धर्त्ता दिवो विभासि रजसः । पृथिव्या
धर्त्ता । उरोरन्तरिक्षस्य धर्त्ता । धर्त्ता देवो देवानां । अमर्त्यस्तपोजाः । हृदे त्वा
मनसे त्वा । दिवे त्वा सूर्याय त्वा । ऊर्ध्वमिममध्वरं कृधि । दिवि देवेषु होत्रा यच्छ ।
विश्वासां भुवां पते । विश्वस्य भुवनस्पते । विश्वस्य मनसस्पते । विश्वस्य वचस-
स्पते । विश्वस्य तपसस्पते । विश्वस्य ब्रह्मणस्पते । देवश्रूस्त्वं देवघर्म देवान्पाहि ।

तपोजां वाचमस्मे नियच्छ देवायुवं । गर्भो देवानां । पिता मतीनां । पतिः प्रजा-
नां । मतिः कवीनां । सं देवो देवेन सवित्रा यतिष्ट । सꣳ सूर्येणारुक्त । आयु-
68 र्दास्त्वमस्मभ्यं घर्म वर्चोदा असि । पिता नोऽसि पिता नो बोध । आयुर्धा-
स्तनूधाः पयोधाः । वर्चोदा वरिवोदा द्रविणोदाः । अन्तरिक्षं उरोर्वरीयान् । अ
अशीमहि त्वा मा मा हिꣳसीः । त्वमग्ने गृहपतिर्विशामसि । विश्वासां मानु-
षीणां । शतं पूर्भिर्यविष्ठ पाह्यꣳहसः । समेद्धारꣳ शतꣳ हिमाः । तं द्रविणꣳ
हार्द्दिवानं । इहैव रातयः सन्तु ॥ इत्यनुवाकेन ॥ परिश्रिते प्रतिप्रस्थाता
पत्नीं वाचयति । त्वष्टीमती ते सपेय । सुरेता रेतो दधाना । वीरं विदेय तव
संदृशि । माहꣳ रायस्पोषेण वियोषं ॥ अध्वर्युः संप्रेष्यति । अग्नीद्रौहिणौ

पुरोडाशावासादय । आग्नीध्रः । अनिष्टुब्धयोः स्रुच्योरुपस्तीर्याभिघारितौ

7 ॥ पुरोडाशानासादयति। अंगारापोहनाद्यभिघारणांतं कृत्वा स्रुचौ गृहीत्वाग्रेण
होतारं पर्याहृत्य । दक्षिणं परिधिसंधिमन्वेकं । उत्तरं परिधिसंधिमान्वितरम्।
अध्वर्यु:। देवस्य त्वा० भ्यामाददे। रशनामादाय । अदित्यै रास्नासि।अग्नितंत्र्य।
८४ पूर्वयाद्वारोपनिष्क्रम्य त्रिरूपा ण्शु घर्मदुघमाह्वयति। इड एह्यदित एहि
सरस्वत्येहि। प्रत्येत्य दोग्ध्रे निदाने इत्यादाय दक्षिणयाद्वारोपनिष्क्रम्य।
गांम एहीति त्रिरुच्चैराह्वयति। अदित्या उष्णीषमसि। रशनया घर्म-
दुघमभिदधाति। वायुरस्यैड:। वत्सम्। पूषात्वोपावसृजतु।अश्विभ्यां
प्रदापय। इत्युपावसृज्य। यस्ते स्तन: शशयो यो मयोभू:। येन विश्वा
पुष्यासि वार्याणि। यो रत्नधा वसुविद्य: सुदत्र:। सरस्वति तमिह धा-
तवेक:॥ घर्मदुघमभिमंत्रयते। उस्त्र घर्मं ण् शिंण्ष। उस्त्र घर्मं पाहि।

घर्मायं त्रिण्ण । निदाय वत्सम् । बृहस्पतिस्त्वोपसीदतु । उपसीदति ।
दानेव: स्थ पेरव: । विष्वग्वृतो लोहितेन । स्तनान्संमृज्य । अश्विभ्यां
पिन्वस्व । सरस्वत्यै पिन्वस्व । पूष्णे पिन्वस्व । बृहस्पतये पिन्वस्व ।
७९ इन्द्राय पिन्वस्व । इन्द्राय पिन्वस्व । वर्षीयसि दोग्ध्रे दोग्धि । तूष्णीं
6 प्रतिप्रस्थाता ह्सीयस्यजाम् । यत्राभिजानात्युत्तिष्ठ ब्रह्मणस्पत इति
तदुपोत्तिष्ठन्त्याग्नीध्रे पयसी प्रदाय पूर्ववज्जुहुत । अध्वर्युः । गायत्र-
मोऽसि । शफमादत्ते । त्रैष्टुभोऽसि । द्वितीयं । प्रतिप्रस्थाता । जागत-
मसि । उपयमनमादत्ते । यत्राभिजानात्युपद्रव पयसा गोधुगिति
तदाग्नीध्रोऽनुप्रपद्यते । अध्वर्युः । सहोर्जो भागेनोप मेहि । पय आह्रि-
यमाणं प्रतीक्षते । इन्द्राश्विना मधुनः सारघस्य । घर्मं पात वसवो

यजेत्ता वट्। महावीरे गोपय आनयति। स्वाहा त्वा सूर्यस्य रश्मये
वृष्टिवनये जुहोमि। उद्यन्तमूष्माणमनुमंत्रयते। इन्द्राग्निभ्यामिदं।
सूर्यस्य रश्मय इदं। प्रतिप्रस्थाता। मधु हविरसि। अजापय आनयति।
सूर्यस्य तपस्तप। उद्यन्तमूष्माणम्। अग्नये स्विष्टकृत इदं। स्कन्ने।
66 अस्कान्द्यौः पृथिवीमस्कान्ट्ऋषभो युवागाः स्कन्ने मा विश्वा भुवना
स्कन्नो यज्ञः प्रजनयतु। अस्कानजनि प्राजनि। आस्कन्नाज्जायते
वृषा। स्कन्नात्प्रजनिषीमहि। इति स्कन्नमभिमंत्र्य। भूपतये स्वाहेति
प्राञ्चं प्रादेशं मिमीते। भुवनपतये स्वाहेति दक्षिणम्। भूतानां
पतये स्वाहेति प्रत्यञ्चम्। भूत्यै स्वाहे[redacted]त्युदञ्चम्। भूर्भुवः सुव-
रित्यूर्ध्वम्। भूपतये स्वाहा। भुवनपतये स्वाहा। भूतानां पतये स्वाहा।

इति स्वन्नमनुमंत्रयते । मा नो घर्म व्यथितो विव्यथो नः । मा नः परमधरं मा
रजो नैः । मोष्वस्माꣳस्तमस्यंत राधाः । मा रुद्रियासो अभिगुर्वृधा नः ।
मा नः क्रतुभिर्हीडितेभिरस्मान् । द्विषा सुनीते मा परादाः । मा नो रुद्रो
६८ निर्ऋतिर्मा नो अस्ता । मा द्यावापृथिवी हीडिषातां । उप नो मित्रावरुणा
विहायतं । अन्वादीध्याथामिह नः सखाया । आदित्यानां प्रसितिर्हेतिः ।
उग्रा शतापाष्ठा घविषा परिणो वृणक्तु । इमं मे वरुणेत्ति-चतसृभिरनु-
मंत्र्य । पिष्टोदकेन महावीरꣳशीतीकृत्य । द्यावापृथिवीभ्यां त्वा परि-
गृह्णामि । शफाभ्यां परिगृह्य प्राच्छिन्नाग्रेण वेदेन भस्म प्रमृज्य । अन्तरि-
क्षेण त्वोपयच्छामि । उपयमनेन प्रतिप्रस्थातोपयच्छति । देवानां त्वा
पितॄणामनुमतो भर्तुꣳशकेयं । अध्वर्युरुपयमनेन सहादायोत्थाय ।

तेजोऽसि तेजोऽनुप्रेहि । दिविस्पृङ्मा मा हिꣳसीः । अन्तरिक्षस्पृङ्मा

॥ मा हिꣳसीः । पृथिवि स्पृडः मा मा हिꣳसीः । सुवरसि सुवर्मे यच्छ । दिवं यच्छ
दिवो मा पाहि । हरति । अजननवानं पञ्च वातनामानि व्याचष्टे । समुद्राय
त्वा वाताय स्वाहा । सलिलाय त्वा० । अनाधृष्याय त्वा० । अप्रतिधृष्याय त्वा० ।
अवस्यवे त्वा वाताय स्वाहा । अपान्य पञ्चोत्तराणि । अग्नये त्वा वसुमते
६९ स्वाहा । सोमाय त्वा रुद्रवते स्वाहा । वरुणाय त्वादित्यवते स्वाहा । बृह-
स्पतये त्वा विश्वदेव्यावते स्वाहा । सवित्रे त्वर्भुमते विभुमते प्रभुमते
वाजवते स्वाहा । एतस्मिन्काले प्रतिप्रस्थाता । उपयमनमन्यस्मै
दत्वा दक्षिणं रौहिणं प्रतिष्ठितं जुहोति । अहर्ज्योतिः केतुना जुषताꣳ सु-
ज्योतिर्ज्योतिषाꣳ स्वाहा । अग्नेर्ज्योतिष इदं । अध्वर्युः । अपरेणाहव-
नीयं दक्षिणाति क्रमन् । विश्वा आशा दक्षिणसत् । ब्रह्माणमीक्षते । विश्वान्दे-
वानयाडिह । होतारम् । स्वाहाकृतस्य घर्मस्य । मधोः पिबतमश्विना । ॥०॥

स्वाहाग्नये यज्ञियाय । शं यजुर्भिः । घर्ममभिमंत्र्य । आश्राव्य अत्याश्राविते ·
संप्रेष्यति । घर्मस्य यज । आश्विना घर्मं पातं हार्दिवानं । अहर्दिवाभिरूतिभिः ।
अनुवां द्यावापृथिवीमं सातां । स्वाहेन्द्राय स्वाहा । वषट्कृते जुहोति ।
इन्द्रायाश्विभ्यामिदं । स्वाहेन्द्रावट् । अनुवषट्कृते जुहोति । अग्नये स्विष्ट-
८० कृत इदं । घर्मं पातमश्विना हार्दिवानं । अहर्दिवाभिरूतिभिः । अनुवां द्यावा-
पृथिवी अमं सातां । तं प्राव्यं यथावट् । नमो दिवे । नमः पृथिव्यै ।
दिविधा इमं यज्ञं । यज्ञमिमं दिविधाः । दिवं गच्छ । अन्तरिक्षं गच्छ । पृथि-
वीं गच्छ । पञ्च प्रदिशो गच्छ । देवान्घर्मपान्गच्छ । इत्युपस्थायोपर्याहव-
नीये धार्यमाणं प्रतिप्रस्थाता शृतदध्नाभिपूरयति । अध्वर्युः । इषे
पीपिहि । ऊर्जे पीपिहि । ब्रह्मणे पीपिहि । क्षत्राय पीपिहि । अद्भ्यः पीपिहि ।

ओषधीभ्यः पीपिहि । वनस्पतिभ्यः पीपिहि । द्यावापृथिवीभ्यां पीपिहि । सु-
भूताय पीपिहि । ब्रह्मवर्चसाय पीपिहि । यजमानाय पीपिहि । मह्यं ज्यैष्ठ्या-
८१ य पीपिहि । विक्षरन्तमनुमंत्रयते । अथैनं दिशोऽनु प्रहानयति । क्षिप्रै
त्वा स्वाहा । क्षिप्रा इदं । पुरस्ताद्धुत्वा प्रतिप्रस्थातरनुजुहुधि इत्याह ।
तेनैव मंत्रेण तस्यामेव दिशि प्रतिप्रस्थाता जुहोति एवं सर्वत्र । द्युम्नाय
त्वा स्वाहा । दक्षिणतः । द्युम्नायेदं । इन्द्रियाय त्वा स्वाहा । पश्चात् । इन्द्रियायेदं ।
भूत्यै त्वा स्वाहा । उत्तरतः । भूत्या इदं । प्रत्याक्रम्योपयमने शोषमानीयान्तर्वे-
द्युपयमनं निधाय पूर्वस्मिन्खरे राजत रुक्मं निधाय । धर्मासि सुधर्मा
मेन्यस्मे ब्रह्माणि धारय । नेत्त्वा वातः स्कन्दयात् । तस्मिन्महावीरं
प्रतिष्ठापयति । अत्र प्रतिप्रस्थाता पूर्ववदुत्तरं रौहिणं जुहोति । अहर्ज्योति-
रिति । अध्वर्युः । अथैतामुल्कलानुपयमनेऽवजञ्जुहोति । पूष्णे शरसे स्वाहा ।
॥ ७४

पूष्णे शरस इदं। ग्रावभ्यः स्वाहा। ग्रावभ्य इदं। प्रतिरेभ्यः स्वाहा। प्रतिरेभ्य
इदं। द्यावापृथिवीभ्याꣳ स्वाहा। द्यावापृथिवीभ्यामिदं। प्राचीनावीती।
८२ पितृभ्यो घर्मपेभ्यः स्वाहा। पितृभ्यो घर्मपेभ्य इदं। यज्ञोपवीत्यप उपस्पृश्य।
षष्ठꣳ रीकृतꣳ सर्वेषु लेपेष्वन्त्कानन्वीक्षमाण उदक्त्वं निरस्यति।
रुद्राय रुद्रहोत्रे स्वाहा। अप उपस्पृश्य। रुद्राय रुद्रहोत्र इदं। अथाप उपस्पृश्य।
विद्युदसीति होष्यन्नप उपस्पृश्य। तूष्णीं काष्ठ कीꣳ समिधमाधाय। प्रजापतये स्वाहा।
प्रजापतय इदं। एतस्मादेव होमादुपयमनेनाग्निहोत्रं जुहोति। स्रुचं गृहीत्वा प्राणया-
पान्य निमील्यवीक्ष्य अभिक्राम्य भूर्भुवः सुवरिति जपित्वा। भूः स्वाहा। अग्नय इदं।
हुत्वा महदभिवेक्षते। ऊर्जे त्वा। प्रागपवर्गमुत्तानेन हस्तेन लेपमुन्मार्ष्टि। ओषधी-
भ्यः स्त्वौषधीर्जिन्व। स्रुच उत्तरतो लेपं निमार्ष्टि। ओषधीभ्य इदं। वर्चो मे यच्छ।
स्रुचꣳ सादयित्वा। अग्ने गृहपते मा मा संताप्सीरासन्नमृतमधिधिषि प्रजा ज्योति-

२॥ रंदंधेन त्वा चक्षुषा प्रतीक्षे। गार्हपत्यं प्रतीक्षते। भूर्भुवः सुवः स्वाहा। प्रजापत-
य इदं। हुत्वा स्रुचमुद्गृह्य। रुद्र मृडानो भव मृड धूर्ते नमस्ते अस्तु पशुपते त्राय-
स्वैनम्। स्रुचमुदगातिवाल्च त्रिः ऽनालास्पर्शेच। रुद्राय पशुपतय इदं। अपउप०।
प्राचीनावीती। ऊर्जे त्वा। स्वधा पितृभ्यः पितृन्जिन्व। दक्षिणतो बर्हिषि लेपं
13 निमार्ष्टि। स्वधा पितृभ्य इदं। यज्ञोपवीत्यपउपस्पृश्य। ऊर्जं मे यच्छ। स्रुचं
सादयित्वा। बर्हिरसंस्पर्शितं कृत्वा। उपयमनं होत्रे प्रयच्छति। अथवा तूष्णीं
मपउपस्पृश्य तूष्णीं समिधमाधाय भूः स्वाहेति हुत्वा होत्रे प्रयच्छति। होत-
रुपह्वयस्व। ब्रह्मन्नुपह्वयस्व। प्रतिप्रस्थातरुपह्वयस्व। अग्नीदुपह्वयस्व।
यजमानोपह्वयस्व। हुतं हविर्मधु हविः। इन्द्रतमेऽग्नौ। पिता नोऽसि मा
मा हिंसीः। अश्यामते देव घर्म। मधुमतो वाजवतः पितुमतः। अंगिरस्वत
117

स्वधापिनः। अत्री महित्वा मा मा हिंसीः। भक्षयति। एवं ब्रह्मादयोऽपि भक्ष-
येयुः। अथवा यजमानः प्रत्यक्षमवघ्राणेन तरे। भक्षयित्वोपयमनं प्रतिप्रस्थात्रे
प्रयच्छति। तदुच्छिष्टखरे भक्षात्यान्तर्वेद्युपयमनं निधाय। तस्मिन्रुक्ममाव-
८४ नधाय मदन्तीरानीयापोहिष्ठा मयोभुवइति तिसृभिर्मार्जयित्वा। अन्तर्वेद्यां
शेषं निनीय। उपयमनेन घर्मप्रायश्चित्तानि जुहोति। प्राणाय स्वाहा।
व्यानाय स्वाहा। अपानाय स्वाहा। चक्षुषे स्वाहा। श्रोत्राय स्वाहा। मनसे
स्वाहा। वाचे सरस्वत्यै स्वाहा। पूष्णे स्वाहा। पूष्णे शरसे स्वाहा। पूष्णे प्र-
पथ्याय स्वाहा। पूष्णे नरंधिषाय स्वाहा। पूष्णे घृणये स्वाहा। पूष्णे नरुणा-
य स्वाहा। पूष्णे साकेताय स्वाहा। चतुर्थ्यन्ता देवता। व्याहृतिभिर्विहृताभिः
समस्ताभिश्च हुत्वा। ऋक्तो यजुष्टोज प्रायश्चित्तमित्यादि हुत्वा। अत्रैव सर्वे

॥ परिघर्म्यं समवधाय वेद्यां । वर्मोव स॰ साचमान[illegible]तुकूहीति संप्रेष्यति ।
आ यस्मिन्सप्तवासवा इन्द्रभिशाय । स्वाहोत्रा सूर्यस्य रश्मिभ्यः । अग्रेणा-
हवनीयं पर्याहृत्य सम्राडासन्द्यां सादयति । यत्राभिजानात्यधि तृणमध्वे
निष्पदातीमिति तत्रामवसृज्य मदन्तीरुपस्पृश्य । शन्नो वातः पवतां मा-
64 तरिश्वा शन्नस्तपतु सूर्यः । अहानि शं भवन्तु नः शं रात्रिः प्रतिधीयताम् ।
शमुषा नो व्युच्छतु शमादित्य उदेतु नः । शिवा नः शंतमा भव सुमृडीका सर-
स्वति । मा ते व्योम संदृशि । इडायै वास्त्वसि वास्तुमद्वास्तुमंतो भूयास्म
मा वास्तोः छित्स्मह्यवास्तुः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ।
प्रतिष्ठासि प्रतिष्ठावंतो भूयास्म मा प्रतिष्ठायाः छित्स्मह्यप्रतिष्ठः स भू-
याद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे । द्वाविमौ वातौ वात आ सिंधोरापरावतः ।
॥४३॥

दक्षं मे अन्य आवातु परान्यो वातु यद्रपः । यद्दो वात ते गृहे मृतस्य निधिर्हितः ।
ततो नो देहि जीवसे ततो नो धेहि भेषजं । ततो नो मह आवह वात आ वातु भेष-
जं शंभूर्मयो भू नो हृदे प्रण आयूंषि तारिषत् । इन्द्रस्य गृहोऽसि तं त्वा प्रपद्ये
१६ सगुः साश्वः । सह यन्मे अस्ति तेन । भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये
भूर्भुवः सुवः प्रपद्ये वायुं प्रपद्ये नार्तां देवतां प्रपद्ये श्मानमाखणं प्रपद्ये
प्रजापतेर्ब्रह्मकोशं ब्रह्म प्रपद्य ओं प्रपद्ये । अन्तरिक्षं म उर्वन्तरं बृहदग्नयः
पर्वताश्च यया वातः स्वस्त्या स्वस्तिमां तया स्वस्त्या स्वस्ति मानसानि ।
प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मयि मेधां मयि प्रजां
मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां
मयि प्रजां मयि सूर्यो भ्राजो दधातु । द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिर-
श्विना सौभगेभिः । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ।

२७॥ कयानश्चित्र आभुव दूती सदावृधः सखा। कया शचिष्ठया वृता। कस्त्वा
सत्यो मदानां मंहिष्ठो मत्सदन्धसः। दृढाचिदारुजे वसु। अभीषुणः सखी-
नामविता जरितृणाम्। शतं भवास्यूतिभिः। वयः सुपर्णा उपसेदुरिन्द्रं प्रि-
यमेधा ऋषयो नाधमानाः। अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्नि-
88 धयेव बद्धान्। शंनो देवी रभिष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु
नः। ईशाना वार्याणां क्षयन्तीश्चर्षणीनां। अपो याचामि भेषजं। सुमित्रा
न आप ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं
द्विष्मः। आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे। यो वः
शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः। तस्मा अरंग मा-
मवो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः। पृथिवी शांता साग्नि-
ना शांता सा मे शांता शुचं शमयतु। अन्तरिक्षं शांतं तद्वायुना शांतं ॥८

तन्नैः शांत ं शुचं ं शमयतु । द्यौः शांता सादित्येन शांता सा मे शांता शुचं ं
शमयतु । पृथिवी शांतिरन्तरिक्ष ं शांतिर्द्यौः शांतिर्दिशः शांतिरवान्तरदिशाः
शांतिरग्निः शांतिर्वायुः शांतिरादित्यः शांतिश्चन्द्रमाः शांतिर्नक्षत्राणि शां-
तिरापः शांतिरोषधयः शांतिर्वनस्पतयः शांतिर्गौः शांतिरजा शांतिरश्वः
16 शांतिः पुरुषः शांतिर्ब्रह्म शांतिर्ब्राह्मणः शांतिः शांतिरेव शांतिः शांतिर्मे
अस्तु शांतिः । तयाहं ं शांत्या सर्व शांत्या मह्यं द्विपदे चतुष्पदे च शांतिं करोमि
शांतिर्मे अस्तु शांतिः । एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं
धर्मश्चैतानि मोत्तिष्ठंतु मनूत्तिष्ठंतु मा मां श्रीश्च ह्रीश्च धृतिश्च तपो मेधा
प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः । उदायुषा स्वायुषोदोषधीनां ं
रसेनो पर्जन्यस्य शुष्मेणोदस्थाममृतां ं अनु । तच्चक्षुर्देवहितं पुरस्ताच्छुक्र-
मुच्चरत । पश्येम शरदः शतं जीवेम शरदः शतं नंदाम शरदः शतं मोदाम शरदः

५। शतं भवाम शरदः शतꣳ शृणवाम शरदः शतं प्रब्रवाम शरदः शतमजीतास्याम शरदः
शतं ज्योक्च सूर्यं दृशे । य उदगान्महतोर्णवाद् विभ्राजमानः सरिरस्य मध्यात्
समा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु । ब्रह्मणश्चोतन्यसि
ब्रह्मण आणीस्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा मही धारित-
१९ मेनेन महदन्तरिक्षं दिवं दाधार पृथिवीꣳ सदेवां यदहं वेद तदहं धारयाणि मा-
मद्वेदोधि विस्रसत् । मेधामनीषे मा विशताꣳ समीची भूतस्य भव्यस्यावरु-
ध्यै सर्वमायुरयाणि सर्वमायुरयाणि । आभिर्गीर्भिर्यदतो न ऊनमाप्यायय
हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते
स्याम । ब्रह्म प्रावादिष्म तन्नो मा हासीत् । ॐ शांतिः शांतिः शांतिः । इत्युक्त-
मानुवाकेन शांतिं कुर्वीत ॥ उपसदस्तत्र प्रक्रमयाति । आतिथ्याबर्हिरुप-
सदामग्नीषोमीयस्य च । या जाता इत्यादि । यत्कृष्णो रूपं कृत्वा ततस्त्वां
दशाधा संभराणि ।

एका॰ समिधं यज्ञायुरनु संचरान्। ततो वेदं कृत्वा। परिस्तृणीत। देवादेवेषु।
कर्मणे वामित्यादि। पात्र प्रयोगकाले। स्फ्यमग्निहोत्रहवणीमपरतः। स्रुवं जुहू-
मुपभृतं ध्रुवां वेदमाज्यस्थालीं वेदाग्राणि चेति द्वंद्वं प्रयुज्य पवित्रे कृत्वा।
९० उपविष्टे ब्रह्मणि यजमान वाचं यच्छेति संप्रेष्यति। संविशंतां पात्राणि संमृशति।
यजमानः। अग्नि॰ होतारं। यज्ञयोगः। अध्वर्युः प्रोक्षणीः स॰ स्कृत्य। ब्रह्माणमामंत्र्य
पात्राणि प्रोक्षति। अत्रवाचं विसृजते। देवस्य त्वेत्यादि उत्करे तृणं निरस्यापउप॰।
पृथिव्यै वर्मासीत्यादि ओषधिभ्योऽधि स्तम्ब यजुर्हरति। अक्ष आद्दायातुधाना
इत्यनंतरं। ब्रह्मन्नुत्तरं परिग्राहं। ऋतमसि। यज्ञस्य त्वा। प्रोक्षणीरासादयेध्म-
मुपसाद्य स्रुवं च स्रुचश्च संमृड्याज्येनोदेहि। आज्यग्रहणकाले ध्रुवायामेव
गृह्णाति। सुप्रजास्त्वाय त्वा। प्रोक्षणीरभिमंत्र्य ब्रह्माणमामंत्र्य। कृष्णोस्याखरे
ष्ठः। इध्मं प्रोक्षति। वेदिरसीति वेदिं प्रोक्षति। स्वधा पितृभ्य इति प्रोक्षणी शेषं निनीय।

सूर्यस्त्वा पुरस्तात्पात्वित्याहवनीयमभि-
६॥ अयं प्राणश्चेति प्रस्तरे पवित्रे अपिसृज्य । मन्त्र्यैकामाघारसमिधमाधाय । विश्वो यन्त्रे-
मन्त्र्य । युनज्मिलेति यजमानः । वीतिहोत्रं लेत्येकामाघारसमिधमाधाय ।
स्थः । परिभोजनीय इभ्यौ । विच्छिनद्मि । वसूनां रुद्राणा । अयं प्रस्तर इति यजमानः ।
तूष्णीं जुहूपभृतावासाद्य । ध्रुवासि घृताची० । योमावाभ्या । ऋषभोऽसि । स्योनो
९७
मैसीद । इयं स्थाली । एतावसदतां सुकृतस्य लोके तौ विष्णो पाहि० नियं ।
विष्णोरसि वैष्णवं धामासि प्राजापत्यं । अयं यज्ञो ममाग्ने चतुर्होतेत्यासंनानभिम-
र्शति । वेदं निधाय सामिधेनीभ्यः प्रतिपद्यत इत्येतदादि । स्रौवमेवाभिघारयेत ।
ततोऽग्नी परिधीनित्याद्यग्ने वाजजिदिति कृत्वा । क इदमित्यादि । आश्राव्याह ।
सीदहोतरित्येतावान्प्रवरः । देवाः पितर इति यजमानः । पञ्चहोता च । ध्रौवाद-
ष्टौ जुह्वां गृह्णाति । चतुरुपभृत्येकमाप्याय्यानाप्याय्य त्रीणि । घृतवति ॥७६
शब्दे जुहूपभृतावादाय दक्षिणा सकृदतिक्रान्त उपांशु याजवत्प्रचरति ।

अग्नये अनुब्रूहि । अग्निं यज । अर्धेन जौहवस्याग्निं यजति । अर्धेन सोमम् ।
अग्नय इदं । हविर्धिरसि । सोमाय अनुब्रूहि । सोमं यज । सोमायेदं । हविर्धिरसि ।
सर्वमौपभृतं जुह्वामानीय । विष्णवे अनुब्रूहि । विष्णुं यज । विष्णव इदं । हविर्धिरसि ।
प्रत्याक्रम्य । ध्रौवाज्यं सर्वं स्रुवेणादायोपसदं जुहोति । या ते अग्ने ऽयाशया
९२ तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा । अग्ने-
रयाशयायै तन्वा इदं । भक्षीमदन्त्यापा २ इत्येतदाद्या निह्नवाः कृत्वाग्नीद्देव-
पत्नीर्व्याचक्ष्व सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति संप्रेष्यति । अपरेण गार्हप-
त्यमाग्नीध्र उपविश्य देवपत्नीर्व्याचष्टे । सेनेन्द्रस्य । धेना बृहस्पतेः । पथ्या
पूष्णः । वाग्वायोः । दीक्षा सोमस्य । पृथिव्यग्नेः । वसूनां गायत्री । रुद्राणां
त्रिष्टुप् । आदित्यानां जगती । विष्णोरनुष्टुप् । वरुणस्य विराट् । यज्ञस्य
पंक्तिः । प्रजापतेरनुमतिः । मित्रस्य श्रद्धा । सवितुः प्रसूतिः । सूर्यस्य मरीचिः ।

५७॥ चन्द्रमसो रोहिणी । ऋषीणामरुंधती । पर्जन्यस्य विद्युत् । चतस्रो दिशः ।
चतस्रोऽवान्तरदिशाः । अहश्च रात्रिश्च । कृषिश्च वृष्टिश्च । त्विषिश्चापचि-
तिश्च । आपश्चौषधयश्च । ऊर्क्च सूनृता च देवानां पत्नयः ॥ उत्करे
सुब्रह्मण्यामाह्वयति । पूर्ववदेनां यजमानोऽनुमंत्रयते । सुपूर्वाह्णे पौर्वा-

ह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां चरन्ति । स्वपराह्ण आपराह्णिकीभ्याम् ।
प्रवर्ग्येण प्रचरिष्यन्तः संवृण्वन्तीत्यादि अग्रेण गार्हपत्यं दर्भान्संस्
तीर्य देवपुरश्चरेति महावीरानासादयन्ति । सर्वाणि च प्रवर्ग्यपात्रा-
णि । मेथीं मयूखान् सम्राडासन्दीं विशाखदामानीति वर्जयित्वा ।
पवित्रकरणादि पूर्ववत् । तस्मिन्प्रचरणीयो महावीरावुपावहरती-
त्यंतं कृत्वोत्तरेणाहवनीयं घृतदध्यासादयतीत्यादि । रात्रिर्ज्योतिः
केतुनाजुषताᳪं सुज्योतिर्ज्योतिषाᳪं स्वाहा । रात्रियै ज्योतिष इदं । सायं

॥अं

रोहिणं जुहोति । अपीपरो माह्नो रात्रियै मा पाहीषा तै अग्ने समित्तया सामिंध्यस्वायुर्मे दा वर्चसा माञ्जी: स्वाहा । सायं काण्टकीं समिधमा-
दधाति । भूर्भुवः सुवः । अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा । सायमग्निहोत्रं
९.४ जुहोति । अग्नये ज्योतिष इदं । इषे त्वा । ओषधीभ्यस्त्वौषधीर्जिन्व । बर्हिर्
लेपं निमृज्य । स्वाहा ~~नन~~ सत्रेभ्य [redacted] । सायं परिघर्म्यं सम्राडासन्द्यां
सादयति । पूर्ववदुपसदं कृत्वा । अग्नीन्मदन्त्यापा इत्यादि । सव्योत्तानैस्तु
सायं निह्नवः । अधिवृक्षसूर्ये अग्नौ ज्योतिष्मतः कुरुतेत्यादि । या ते अग्ने
रुद्रिया तनूरिति व्रतयति । जागर्येतां रात्रिम् । उषोदये अग्नीञ्ज्योति-
ष्मत इत्यादि वाग्विसर्गे कृते पूर्ववत् पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां
चरन्ति । अपीपरो मा रात्रिया अह्नो मा पाहीत्यादि समिदाधानम् ।

सवितुः सवे । संप्रेष्यति ।

।। भूर्भुवः सुवः । सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा । इति होमः । याते अग्ने
रजाशया तनूरित्युपसद्धोमः । अग्ने रजाशयायै तन्वा इदं । अन्तरा
मध्यमे प्रवर्ग्येऽपि सदो नेदिं कुर्वन्ति ।। इति द्वितीयः प्रश्नः ।। प्राग्वंश
स्य मध्यमाल्ललाटिकात् प्राचः प्रक्रमान्प्रक्रम्य शंकुं निहन्ति । तस्मा-
९५ त्पंचदशासु दक्षिणतः । एवमुत्तरतः । ते श्रोणी । प्रथमनिहिताच्छङ्कोः षट्त्रिंश
शतिः पुरस्तात् । तस्माद्द्वादशासु दक्षिणतः । एवमुत्तरतः । तावंसौ । इति
शुल्बमानं कृत्वा । त्रिभिर्मे त्वा पर्यश्मकरीं देवानां धेनुं सुदुघामनपस्फुर-
न्तीम् । इन्द्रः सोमं पिबतु क्षेमो अस्तु नः । पुनर्मानं कृत्वा । सर्वतः स्पन्द्यया
पर्यातनोति । मध्ये पृष्ठ्याम् । इमां नराः कृणुत वेदिमेत्य वसुमतीं रुद्रवती-
मादित्यवतीं वर्ष्मन्दिवो नाभा पृथिव्या यथायं यजमानो न रिष्येद्देवस्य
सवितुः सवे । संप्रेष्यति । लौकिकेन स्फ्येन विघनेन पर्श्वा परशुना च ।।७

मास

सर्वेऽध्वर्यवो वेदिं कुर्वन्ति। वेदिकरणानि अज्ञातानि निधाय। वस्यावेदिमि-
ति वेदं कृत्वा स्फ्याद्दानादि। दर्शपूर्णवत्संनमत्र नर्जं प्रागुत्तरात्परिग्राहस्काल।। (मास)
९१ उपरवदेशो स्तम्बयजुर्हरणम्। ऋतमसीति पूर्वपरिग्रहः। चात्वालात्कुहस्सु अग्र-
मेषु प्रत्यगुलकरस्तस्मिन्निवपति। चतुः शिखण्डा युवतिः सुपेशा घृतप्रतीका
९६ भुवनस्य मध्ये। तस्यां सुपर्णावधि यो निविष्टौ तयोर्देवानामधि भागधेयम्।
महावेदिमभिमंत्र्य। अथोत्तरवेदिमुपवपति। वित्तायनीमसीत्यादि दक्षिणतो
निःसारणांतं पशुवत्। वेदिकरणकाले ब्रह्मा दक्षिणत आस्ते यजमानश्च। उ-
खरशाखाभिः प्लक्षशाखाभिर्वा प्रच्छन्नां वसति। ततो गार्हपत्ये दीक्षितस्य
क्षतं अप्ययतीत्यादि नाभ्यभिमर्शनांतम्। या ते रुद्रिया तनूरिति व्रत- अग्ने
यति। ततो यूपकर्म। उरु विष्णो विक्रमस्वेत्यादि (अग्ने) चषालकरणांतं पशुवत्।
आपराह्णिकीभ्यां प्रचर्य। अग्नीज्योतिष्मतः कुरुतेत्यादि व्रतानंतरम्। यजमानः। ९
वाजपेयात् चषालनादि

ाम

०९॥ अग्ने त्वं सुजागृहि वयं सुमन्दिषीमहि गोपाय नः स्वस्तये प्रबुधे नः पुनर्ददः ।
स्वपस्यन्नाहवनीयमभिमन्त्रयते । दक्षिणेनाहवनीयं प्राङ्शेते न न्यञ्चोत्तानो
नाग्नेरपपर्यावर्तेत । त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः । अ-
१०० बुध्याभिमन्त्र्य । विश्वे देवा अभि मामावर्वृत्रन् । जपति । पुनर्मनः पुनरायुरा-
गात्पुनः प्राणः पुनराकूतमागात् । वैश्वानरो दब्धस्तनूपा अवबाधतां दुरितानि
विश्वा । इति च मुष्टी वाचं वा विसृज्यादीक्षितवादं वोदित्वा । त्वमग्ने व्रतपा अ-
९० सीत्याहवनीयमभिमन्त्रयते । इयं ते यज्ञिया तनूरपो मुञ्च पृथिव्यां संभवेति च । अस्तो-
दये प्रतिप्रस्थाता वाचं यमयति । अग्नीज्योतिष्मतः कुरुतेत्यादि वाग्विसर्ज-
नान्ते पौर्वाह्णिकीभ्यां प्रचरन्ति । अहर्ज्योतिरिति रोहिणौ जुहोति । अग्निः परो
मा रात्रिया अह्नो मा पाहीति समिधमाधाय । सूर्यो ज्योतिरिति जुहोति । स्वाहा
त्वा सूर्यस्य रश्मिभ्यः । इति सादयति । या ते अग्ने हराशया तनूरित्यादिना
उपसदं जुहोति । अग्नेर्हराशया येतन्वा इदं । सुब्रह्मण्यां ते तदानीमेवापराह्णिकीभ्यां

॥ ॥

ञ्चरन्ति । रात्रिर्ज्योतिरिति रौहिणहोमः । तूष्णीं समिधमाधाय भूः स्वाहेत्यग्नि-
होत्रं जुहोति । स्वाहा त्वा नक्षत्रेभ्य इति सादयति । सुब्रह्मण्यां ते । प्रवर्ग्यमुद्वास-
यिष्यन् । अग्नीत् अजां ते ददामि । ब्रह्मन् पष्ठौहीं ते ददामि । होतर्धेनुं ते ददामि ।
१०१ अध्वर्यो रुक्मौ ते ददामि । अपरं खरं पूर्वस्मिन्खरे न्युप्योच्छिष्टखरꣳ सꣳ
स्कृत्योत्तरेणाहवनीयꣳ सम्राडासन्दीं प्रतिष्ठाप्य तस्याꣳ सर्वं परिघर्म्यꣳ
९८ समवधाय । उपयमन्यां चतुर्गृहीतं गृहीत्वा । घर्म या ते दिवि शुक् । या गायत्रे
छन्दसि । या ब्राह्मणे । या हविर्धाने । तां त एतेनावयजे स्वाहा । घर्मायेदं । तिष्ठ-
न्नास्यदघ्ने जुहोति । घर्म या तेऽन्तरिक्षे शुक् । या त्रैष्टुभे छन्दसि । या राजन्ये ।
याग्नीध्रे । तां त एतेनावयजे स्वाहा । घर्मायेदं । नाभिदघ्ने जुहोति । घर्म या ते
पृथिव्याꣳ शुक् । या जागते छन्दसि । या वैश्ये । या सदसि । तां त एतेनाव
यजे स्वाहा । घर्मायेदं । जानुदघ्ने जुहोति । अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यतां ।

... स्तनुवं पाहि । श्रोत्रस्य त्वा

।।म = एकस्यां पात्र्यामुच्छिष्टखरं निधाय पात्रं गृहीत्वा जघनेन गार्हपत्यं दक्षिणाग्नेर्दक्षिणतो गत्वा अ.ल.
= पूर्वया द्वारोपनिष्क्रम्य दक्षिणेन वेदिं गत्वा मार्जालीयदेशे पात्रं निदधाति। खरनेतुरान्यमन्त्रम्। ज.

८०।। अग्निश्च हव्यवाहनो भवतं दाशुषे मयः।। परिश्रिते प्रतिप्रस्थाता पत्नीमुदान-
यति। अन्विदनुमते त्वं मन्यासै शं च नः कृधि। क्रत्वे दक्षाय नो हिनु प्रण

१०२ आयूंषि तारिषः। पत्नीसहिताः सर्वर्त्विक्कर्तारः प्राग्वंशादुपनिष्क्रामन्ति।
ee अनुसरन्ति मेथीमभिं मयूखान्विनाराखदामानि खरानिति। दक्षिणत उच्छिष्ट-
खरं परिहरति। सम्राडासन्द्या दावन्तर्वेदि पादौ द्वौ बहिर्वेदि प्रतिष्ठाप्य संप्रेष्यति।
प्रस्तोतः साम गाय। सर्वे सहपत्नीकास्त्रिः साम्नो निधनमुपयन्ति। दिवस्त्वा
परस्पायाः। अन्तरिक्षस्य तनुर्नः पाहि। पृथिव्यास्त्वा धर्मणा। वयमनुक्रामाम
सुविताय नव्यसे। प्रथमेऽभि प्रव्रजन्ति। अर्धाधो संप्रेष्यति। प्रस्तोतः साम गाय।
ब्रह्मणस्त्वा परस्पायाः। क्षत्रस्य तनुर्नः पाहि। विशस्त्वा धर्मणा। वयमनुक्रामाम
सुविताय नव्यसे। द्वितीयेऽभि प्रव्रजन्ति। आप्यापरेणोत्तरवेदिं संप्रेष्यति।
प्रस्तोतः साम गाय। प्राणस्य त्वा परस्पायै। चक्षुषस्तनुर्नः पाहि। श्रोत्रस्य त्वा ।।:

धर्मणा । वयमन्वक्रामाम सुवितायनव्यसे । तृतीयेऽभिप्रव्रजन्ति । उत्तरेणोत्तर
वेदिं संम्राडासन्दीं प्रतिष्ठाप्य संप्रेष्यति । प्रस्तोतर्वार्षाहरं साम गायेष्टा-
१०२ होत्रीयं साम गाय । इष्टाहोत्रीयस्य साम्नो निधनमुपयन्ति । न वार्षाहरस्य ।
उदकुम्भमादायाध्वर्युः । वल्गुरसि शंयुधायाः । शिशुर्जनधायाः । त्रिः प्रदक्षिणमु-
१०७ त्तरवेदिं परिषिञ्चन्पर्येति । निधाय कुम्भं पुनरादाय । शं च वक्षि परि च वक्षि ।
त्रिरपरिषिञ्चन्प्रतिपर्येति । चतुःस्रक्तिर्नाभिर्ऋतस्य । उत्तरवेदिमभिमृश्य ।
उत्तरेणोत्तरनाभिं खरौ व्युप्य । सदो विश्वायुः शर्म सप्रथाः । अनुव्यूहति ।
अप द्वेषो अप ह्वरः । अन्यव्रतस्य सश्चिम । मार्जालीय उच्छिष्टखरं व्युप्याऽनु-
व्यूहति । उत्तरेणोत्तरनाभिं खरे हिरण्यं निधाय तस्मिन्प्रचरणीयं महावीर-
मुपावहरति । अत्रैवेतरौ पूर्वापरौ दक्षिणोत्तरौ वा । अत्रैव सर्वं परिचर्यं
सर्वतः परिमण्डलमादित्यस्य रूपं करोति । मही नां पयोऽसि विहितं देवत्रा ।

९।। महावीरे गोपय आनयति । ज्योतिर्भा असि वनस्पतीनामोषधीनाꣳ रसः ।
मध्वानयति । वाजिनं त्वा वाजिनोऽवनयामः । ऊर्ध्वं मनः सुवर्गं । दध्यान-
यति । एवं द्वितीये तृतीये चानयति । घर्मैतत्तेऽन्नमेतत्पुरीषम् । तेन वर्धस्व
१०४ चाचप्यायस्व । वर्धिषीमहि च वयं । आ च प्याशिषीमहि । दध्नामधुमिश्रेण
पात्राणि पूरयति यान्यासेचनवन्ति । अभ्युक्षतीतराणि । अथैनमुपतिष्ठन्ते ।
१११ [रंतिर्नामासि दिव्यो गंधर्वः । तस्य ते पद्वद्धविर्धानम् । अग्निरध्यक्षाः । रुद्रोऽधि-
पतिः । समहमायुषा । सं प्राणेन । सं वर्चसा । सं पयसा । सं गौपत्येन । सꣳ
रायस्पोषेण । वि पाप्मा । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः । अचिक्रदद्वृषा
हरिः । महान्मित्रो न दर्शतः । सꣳ सूर्येण रोचते । चिदसि समुद्रयोनिः । इन्दुर्द-
क्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युः । महान्सधस्थे ध्रुव आ
निषत्तः । नमस्ते अस्तु मा मा हिꣳसीः । विश्वावसुꣳ सोम गंधर्वम् । आपो—
।।८९।

...सा गार्हपत्यमुप-

ऋद्युषीः। तद्धतेना व्यायन्। तदुन्ववैत्। इन्द्रो शारहाण आसां। [3] परि-
१०५ सूर्यस्य परिधिं ऽपश्यत्। विश्वावसुरभि तन्नो गृणातु। दिव्यो
गंधर्वो रजसो विमानः। यद्वा घा सत्यमुत यन्न विद्म। धियो हिन्वानो
१०२ धिय इन्नो अव्यात्। सस्निमविंदच्चरणे नदीनां। अपावृणोद्दुरो अ-
श्मव्रजानां। प्रासां गंधर्वो अमृतानि वोचत्। इन्द्रो दक्षं परिजाना
दहीनम्। इति च पत्नी परिश्रयणीं विहाय। एतत्त्वं देव घर्म देवो देवा-
नुपागाः। इत्यभि मंत्र्य। इदमहं मनुष्यो मनुष्यान्। सोमपीथानु मेहि।
सह प्रजया सह रायस्पोषेण। प्रदक्षिणमावृत्य। सुमित्रा न आप ओषधयः
सन्तु। दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः। उच्छिष्टखरे मार्ज-
यित्वा। उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरं। देवं देवत्रा सूर्यमगन्म
ज्योतिरुत्तमं। आदित्यमुपस्थाय। उदुत्यं चित्रमिति द्वाभ्यां गार्हपत्यमुप-

९४॥ तिष्ठन्ते । इममूषुत्यमस्मभ्यंॅ सनिं । गायत्रं नवीयांॅसं । अग्ने देवेषु प्र-
वोचः । इत्याहवनीयमुपतिष्ठन्ते ॥ पशुबन्धवदग्निं प्रणयति । आहवनीये
१०६ प्रणयनीयमित्यादि उत्तरवेद्यामुपर्यग्नौ धार्यमाणे व्याघारणप्रभृति संभार-
निवपनांतं कृत्वा । अग्ने वाधस्वेत्यादि अतिमुक्ति होमांतं पशुवत्करोति ।
१०३ कर्मणेवां । तूष्णीं स्फ्यमादाय । श्लक्ष्णनुत्तरं । वसनस्त्वा । यज्ञस्य त्वा । धर
असि । उदादाय । वेदिमनुवीक्षते । अत्र प्रतिप्रस्थाता शाखामाहृत्य मैत्रा-
वरुण्याः पयस्याया वत्सानपाकरोति । इषे त्वेत्यादि आप्यायध्वमघ्निया
मित्रावरुणाभ्यां देवभागं । कुंभ्यालेपनांतं । अध्वर्युः । प्रोक्ष्य बर्हिस्त्रिर्वेदिं
प्रोक्षति । नाप्रोक्षितामभिचरन्ति । अथैनां बर्हिषा बहुलं प्राचीनंॅ स्तीर्त्वा
प्रयुक्ते पूर्ववच्छकटे नद्धयुगे प्रतिहलवाम्ये प्रक्षाल्य तयोः प्रथमग्रथितान्
ग्रन्थीन्विस्रस्य नवान्प्रज्ञातान्कृत्वाग्रेण प्राग्वंॅशमभितः पृष्ठ्याम- ॥९२

व्यननयन्परिश्रिते सच्छदिषि अवस्थापयति । अथैने पत्नीपदत्तृतीये-
नाज्यमिश्रेण चतुर्धाकृतेन । आ नो वीरो जायतां कर्मण्यो यं सर्वे ऽनु
१०७ जीवाम यो बहूनामसद्वशी । दक्षिणामक्षधुरं दक्षिणेन हस्तेनोत्तानेन
प्राचीनमनक्ति । एवमितराम् । द्वितीयभागेन तथोत्तरस्य हविर्धानस्यो-
१०८ पानक्ति । नभ्य हस्तमावर्तयति । युञ्जते मन उत युञ्जते धियो विप्रा
विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य
सवितुः परिष्टुतिः स्वाहा । औत्तरवेदिके जुहोति । सवित्र इदं । हविर्धानाभ्यां
प्रवर्त्यमानाभ्यामनुब्रूहि । संप्रेष्यति । प्रथमायां त्रिरनूक्तायां । प्राची प्रेत-
मध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जीह्वरतं । उद्गृह्णन्तः प्रवर्तयन्ति
अध्वर्युर्यजमानप्रतिप्रस्थातारः । सुवाग्देव दुर्यां आवद देवश्रुतौ
देवेष्वा घोषेथां । अक्षशब्दमनुमंत्रयते । प्रतिप्रस्थाता च स्वाक्षशब्दम् ।

।८३।। अध्वर्युः। दक्षिणस्य हविर्धानस्य वर्त्मनि हिरण्यं निधाय। इदं विष्णुर्विचक्रमे
त्रेधा निदधे पदं। समूढमस्य पांसुरे स्वाहा। हिरण्ये शकटे जुहोति। विष्णव इदं।
108 एवमुत्तरस्य प्रतिप्रस्थाता। इरावती धेनुमती हि भूतं सूयवसिनी
मनवे यशस्ये। व्यस्कभ्ना रोदसी विष्णुरेते दाधार पृथिवीमभितो मयूखैः
105 स्वाहा। हिरण्ये जुहोति। विष्णव इदं। अध्वर्युः। अप जन्यं भयं नुदाप चक्राणि
वर्तय। गृहं सोमस्य गच्छतं। वेद्या त्रितृतीयदेशे पदापनुदति। लोष्टं वा बहि-
र्वेदि निरस्यति। आहवनीयात् ओन्नतीचः प्रक्रमानुच्छिष्य। अत्र रभेथां
वर्ष्मन्पृथिव्याः। उभौ शकटे मध्यस्थे स्थापयतः। वैष्णवमसि विष्णुस्त्वो-
त्तभ्नातु। उपस्तंभनमुभयोः। दिवो वा विष्णवुत वा पृथिव्या महो वा विष्ण-
वुत वान्तरिक्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैः आ प्रयच्छ दक्षिणादोत सव्यात्।
अध्वर्युर्दक्षिणस्य हविर्धानस्य दक्षिणं कर्णतर्दमनु मेथीं निहन्ति। तस्या- ।।८३

मीषां निनह्यति । एनमुत्तरस्य प्रतिप्रस्थाता । विष्णोर्नुकं वीर्याणि प्रवोचं
१०९ यः पार्थिवानि विममे रजाꣳसि यो अस्कभायदुत्तरꣳ सधस्थं विचक्रा-
माणस्त्रेधोरुगायः । उत्तरं कर्णातर्दमनु मेथीं निहन्ति । ऊर्ध्वाः शम्या उद्धृ-
ह्योपरिशत्परिवेष्टयन्ति । अस्मिन्काले हविर्धानस्य शुल्बमानं नवारत्नि विस्तारं
१०८ नवायामं मीत्वा । हविर्धाने संमीयमाने ब्रह्मा चात्वालोत्करावंतरेण गत्वाप-
रेणोत्तरवेदिमतिक्रम्य दक्षिणत उपविश्यात्यावैसर्जनकालादास्ते । अध्वर्युः ।
महो नो विष्णो । सर्वतः स्थूणाः परिमिनोति । पुरस्ताच्छान्तः रवरायावकाशꣳ
त्रिष्ठ्वा । उदञ्चौ वꣳशानत्यादधाति पश्चात्पुरस्ताच्च । समामꣳ सांकाशिनꣳ
शालामुखीयहोत्रीयोत्तरवेदिकानाम् । विष्णो रराटमसि । पुरस्ताद्रराट्यां
तिर्यञ्चं वꣳशं धारयन् । विष्णोः स्यूरसि । स्यूत्वा । विष्णोर्ध्रुवमसि । प्रज्ञा-
तं ग्रन्थिं कृत्वा अन्यौ वꣳशानत्याधाय । विष्णोः पृष्ठमसि । तेषु मध्यमं

।।५

१८७। छर्दिरध्यूहति प्रचरणिनिस्तारं नवायामम्। तूष्णीमितरे छर्दिषी अध्यूह्य
छद्यन्तरालेषु प्रवर्तमुपास्यति। कयाऽस्तेजनीः। तेऽन्तर्वर्ता भवन्ति। परि मंत्र
। त्वा गिर्वणो गिर इमा भवन्तु विश्वतो वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः। आ१८
य सर्वतः परिश्रित्य। विष्णोः श्नप्त्रे स्थः। रराट्या अंतौ संमृशति। विष्णोः स्यूरसि। स९
११० दक्षिणां द्वार्बाहुं स्यूत्वा। विष्णोर्ध्रुवमसि। अप्रज्ञातं ग्रन्थिं करोति। एव-
मुत्तरां प्रतिप्रस्थाता। एवमपरे सीव्यतः। पुरस्तादुन्नतं पश्चान्निनतं
१०६ हविर्धानम्। वैष्णवमसि विष्णवे त्वा। संमितमभिमृशति। प्रतद्विष्णुस्तवते
वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षि-
यन्ति भुवनानि विश्वा। संमितात्प्राङ् यजमानो निष्क्रम्याहवनीयात्त्रीन्प्राचः
प्रक्रमान्प्रक्रामति। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा॥

आ—

इति षट्सु प्रक्रमेषूत्करात्प्रत्यगाग्नीध्रं मिनोति षडरत्निविस्तारं षडायामम्।
अर्धमन्तर्वेद्यर्धं बहिर्वेदि। प्राचीनवंशं चतुःस्थूणं दक्षिणतःउपचारं
सर्वतः परिश्रितम्। अपरस्माद्धिष्ण्यात्त्रिषु पुरस्तात्प्रक्रमेषु तिर्यक् सदो
१११ मिनोति। नवारत्निविस्तारं अष्टादशोदगायतम्। दक्षिणतः प्रक्रमे पृष्ठ्या-
या औदुम्बरीं मध्ये सदसो मिनोति। यूपवदौदुम्बर्या अवट संस्कारः
१०८ शकलवर्जम्। देवस्य त्वेत्यभ्रिमादाय। परिलिखितमिति त्रिः परिलिख्य
खनति। अग्रेणावटं औदुम्बरीं प्राचीं निधाय तूष्णीं प्रक्षाल्यायैनां
यवमतीभिः प्रोक्षति। दिवे त्वेत्यग्रम्। अन्तरिक्षाय त्वेति मध्यम्। पृथिव्यै
त्वेति मूलम्। प्रोक्षणीशेषमवटे निनीय। यवोसीति। यवमवास्य।
प्राचीनावीती। पितृणां सदनमसीति बर्हिरवस्तीर्य यज्ञोपवीत्युपम॰

...।म ... ।... ... प्रजा ... ... भूमिं ... ...कुम्भ

८८। उद्दिवं स्तभानान्तरिक्षं पृणपृथिवीं ... । प्राचीनकर्णां सहोऽप्रात्रोन्त्रयति।
द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणयोर्ध्रुवेण धर्मणा। प्राचीनकर्णां ... स-
हो ... मिनोति। ब्रह्मवनिं त्वेत्यादि यूपवत्परिषेचनांतं कृत्वा। तस्या
११२ विशाखे हिरण्यं निधाय। घृतेन द्यावापृथिवी आपृणेथां स्वाहा।
स्रुवेण हिरण्ये जुहुयात्तमौदुम्बरीमन्ववस्रावयति भूमिगते स्वाहाकारः।
द्यावापृथिव्यामिदं। ऊर्ध्वं निखाताद्यजमानसंमिता। नाभिदघ्नः पर्य-
नीताः। उदञ्चः प्रांचश्च वंशानत्साधाय। ऐन्द्रमसि। त्रीणि मध्यमा-
नि छदीं व्यध्यूहति। विश्वजनस्य छाया। त्रीणि दक्षिणानि उत्तराग्राणि।
इन्द्रस्य सदोऽसि। त्रीण्युत्तराणि दक्षिणाग्राणि। औदुम्बरीमध्यग्राणि
भवन्ति। कया स्तोजनीः। छद्यन्तरालेषु प्रवर्तमुपास्यति। परित्वा
गिर्वणो गिर इति। सर्वतः परिश्रित्य। इन्द्रस्य स्यूरसि। पूर्वद्वारस्य
कृत्वा। ... पृथिवी ... ... । ... ... ।।८८
... ... ।।

दक्षिणां द्रान्तिहुण् स्थूला । इन्द्रस्य ध्रुवमसि । प्रज्ञातं ग्रन्थिं करोति । एव-
मुत्तरां प्रतिप्रस्थाता । एवमपरे सीव्यतः । ऐन्द्रमसीन्द्राय त्वा । अध्वर्युः
संमितमभिमृशति । नाध्वर्युः प्रत्यङ् सदोऽतीयात् । धिष्णिया होतारं
११३ वा । यद्यतीयादैन्द्रियर्चा संचरेत् । आघाये अग्निर्मि..ते स्तृणन्ति
बर्हिरानुष्टुक् । येषामिन्द्रो युवा सखा । इति स्तरणीमेतामेके समामनन्ति ।
११०। दक्षिणस्य हविर्धानस्याधस्तात्पुरोऽक्षं चतुर उपरवानवान्तरदेशेषु प्रादेश-
मुखान्प्रादेशान्तरालान्करोति । देवस्य त्वेत्यभ्रिमादाय । परिलिखितमिति
त्रिर्दक्षिणपूर्वं परिलिखति । एवमितरानप्रदक्षिणमुत्तरापवर्गम् । एवमनुपूर्वा-
ण्येवैषूवत ऊर्ध्वं कर्माणि क्रियन्ते । अधस्तात्संतृण्णा भवन्ति । उपरिष्टादसं-
भिन्नाः । तूष्णीं बाहुमात्रान्खात्वाप्उपस्पृश्य । रक्षोहणो वलगहनो वैष्णवान्ख
नामि । खनत्यप्उप० । विराडसि सपत्नहा । बाहुमुपावहृत्य । इदमहं तं वलग-

साम

।९५। मुद्दपामि यन्नेः समानो यमसमानो निचखानेदमैनमधरं करोमि योनेः
समानो योऽसमानोऽरातीयति। उदुप्य। गायत्रेण छन्दसावबाढो वलगः।
उपरवन्यन्तेऽवबाधते। हरामि वैष्णवान्। हरति। अवबाढो दुरस्युः। अग्रे-
११४ णोपस्तम्भनं निवपति। एवं सर्वान्करोति। मित्रोऽसि। सम्राडसि भ्रातृ-
व्यहा। बाहुमुपावहृत्य। त्रैष्टुभेन छन्दसावबाढो वलगः। इत्यवबाधते।
१११ द्वितीये शेषं पूर्ववत्। स्वराडस्यभिमातिहा। बाहुमुपावहृत्य। जागतेन
छन्दसावबाढो वलगः। इति तृतीये शेषं पूर्ववत्। विश्वाराडसि विश्वासां
नाष्ट्राणां हन्ता। बाहुमुपावहृत्य। आनुष्टुभेन पाङ्क्तेन छन्दसावबाढो
वलगः। इति चतुर्थम्। विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्य-
भिमातिहा विश्वाराडसि विश्वासां नाष्ट्राणां हन्ता। बाहू उपावहरतोऽध्व-
र्युर्यजमानश्च। संमृज्य इमामायुषे वर्चसे च देवानां निधिरसि द्वेषो यन्तेः।

। मादृणादि

युयोध्यस्मद्द्वेषांसि यानि कानि चकृम। देवानामिदं निहितं यदस्त्य-
११५ थाभाति प्रदिशश्चतस्रः। कृण्वानो अन्यां अधरान्सपत्नान्। दक्षिणपूर्व
मुपरवं संमृशतः। एवमितरान्संमृश्य। दक्षिणपूर्वं यजमानोऽवमृशति।
उत्तरापरमध्वर्युः। अथ यजमानः पृच्छति। अध्वर्यो किमत्र इति। भद्रं
११६ इत्यध्वर्युः प्रत्याह। तन्नौ सहेत्युक्त्वा उत्तरपूर्वं यजमानोऽवमृशति। दक्षि-
णापरमध्वर्युः। अध्वर्यो किमत्र। यजमानः पृच्छति। भद्रमित्यध्वर्युराह।
तन्नौ। इति यजमानः। रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान्। यवमती-
भिर्दक्षिणपूर्वमुपरवं प्रोक्ष्य। रक्षोहणो वलगहनोऽवनयामि वैष्णवान्।
प्रोक्षणीशेषमवटेऽवनीय। यवोऽसीति यवमवास्य। रक्षोहणो वलगहनोऽ
वस्तृणामि वैष्णवान्। बर्हिषावस्तीर्य। रक्षोहणो वलगहनोऽभिजुहोमि
वैष्णवान्स्वाहा। आज्येनाभिजुहोति। वैष्णवेषु उपरवेभ्य इदं। प्रोक्षणादि

८७॥ होमांतं सर्वेषां करोति । सौकुमारे कालसोमगते पात्वाहो वा आधेयजणपक्षते ।
रक्षोहणौ वलगहनौ प्रोक्षामि वैष्णवी । प्रोक्ष्य । रक्षोहणौ वलगहना
वुपदधामि वैष्णवी । उपरवेषूपदधाति । द्वौ दक्षिणेनाभिदधाति । द्वावुत्तरेण ।
शुष्के नष्टे ग्राधिमुरवे पुरस्तात्यम । निकृते पश्चात् । संहिते पुरस्ता-
११६ द्ध्यकुलेन पश्चादसंहिते भवतः । रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी ।
उपरव पांसुभिः प्रदक्षिणं पर्यूह्य । रक्षोहणौ वलगहनौ परिस्तृणामि वैष्णवी ।
११३ बर्हिषा परिस्तीर्य । रक्षोहणौ वलगहनौ वैष्णवी । अभिमंत्रयते । उपरव
पांसुभिश्चतुरस्रं खरं करोति । पुरस्तात्संचरं शिनष्टि । चात्वालाद्द-
खव क्षिणायानुपवपति । तूष्णीं [redacted] निवा मृदमादाय । विभूरसि प्रवाहणो रौद्रे-
णानीकेन पाहि माऽग्ने पिपृहि मा मा माहिंसीः । आग्नीध्रे आग्नीध्रीयं
निवपति । वह्निरसि हव्यवाहनो रौद्रेणा० सीः । सद्रसि पूर्वार्धे पृष्ठ्याया॰

होत्रीयम्। तं दक्षिणेन। आत्रोऽसि प्रचेता रौद्रेणा॰ सी:। प्रशास्त्रीयम्।
उत्तरेण होत्रीयमितरानुदीच आयातयति। तुथोऽसि विश्ववेदा रौद्रेणा॰
सी:। ब्राह्मणाच्छंसीयम्। उशिगसि कवि रौद्रेणा॰ सी:। पोत्रीयम्। अङ्घा-
११७ रिरासि बम्भारी रौद्रेणा॰ सी:। नेष्ट्रीयम्। अवस्युरसि दुवस्वान् रौद्रेणा॰ सी:।
११८ अच्छावाकीयम्। शुन्ध्युरसि मार्जालीयो रौद्रेणा॰ सी:। बर्हिः सदसो मार्जालीयं
दक्षिणे वेद्यन्ते समभाग्नीध्रीयेण। अनुदिशालीतरान्। तस्य तस्य पश्चादग्रे
स्थित्वा। अध्वनामध्वपते नमस्ते अस्तु मा मा हिंसीः। सम्राडसि कृशानू
रौद्रेणा॰ सी:। आहवनीयम्। अध्वनामध्व॰ सी:। परिषद्योऽसि पवमानो
रौद्रेणा॰ सी:। बहिष्पवमानास्तावम्। अध्वनामध्व॰ सी:। प्रतक्वाऽसि नभ-
स्वान् रौद्रेणा॰ सी:। चात्वालम्। अध्वनामध्व॰ सी:। असंमृष्टोऽसि हव्यसूदो
रौद्रेणा॰ सी:। शामित्रम्। अध्वनामध्व॰ सी:। समूह्योऽसि विश्वभरा रौद्रेणा॰ सी:।

९८॥ उत्करम् । अध्वनामध्व० सी: । ऋतधामासि सुवर्ज्योति रौद्रेणा० सी: । औदु-
म्बरीम् । अध्वनामध्व० सी: । ब्रह्मज्योतिरसि सुवर्धामा रौद्रेणा० सी: । ब्राह्मणम् ।
अध्वनामध्व० सी: । सदस्योऽसि मलिम्लुचो रौद्रेणा० सी: । सदस्यम् । अध्वना
११६ मध्व० सी: । समुद्रोऽसि विश्वभरा रौद्रेणा० सी: । सद: । अध्वनामध्व० सी: ।
अजोऽस्येकपात् रौद्रेणा० सी: । शालामुखीयम् । अध्वनामध्व० सी: । अहिरसि
बुध्नियो रौद्रेणा० सी: । प्राजहितम् । अध्वनामध्व० सी: । कव्योऽसि कव्य-
११८ वाहनो रौद्रेणा० सी: । दक्षिणाग्निम् । अध्वनामध्व० सी: । आयुर्बृहत्तदश्रीय
तन्मावतु तस्य नाम्ना वृश्चामि योऽस्मान्द्वेष्टि यं च वयं द्विष्मो रौद्रेणा० सी: ।
हविर्धानम् । अध्वनामध्व० सी: । विश्वायुर्नभिदेव्यं तदश्रीय तन्मावतु तस्य०
सी: । आग्नीध्रम् । अध्वनामध्व० सी: । आयु:पति रथंतरं तदश्रीय तन्मावतु
तस्य० सी: । सद: ॥ स्तृणीत बर्हि: प्रव्रतं यच्छत । इति संप्रेष्यति । अत्र ॥९९॥

स्तृणन्नुत्तरवेदिं स्वरोपरवं धिष्णिया नाभिस्तृणीयात्। प्रतिप्रस्थाता शाला-
मुखीये दीक्षितस्य व्रतं श्रपयति दक्षिणाग्नौ पत्न्या इत्यादि। अपरेणोत्तर-
११९ वेदिं व्रतमत्याहृत्य प्रयच्छति। या ते अग्ने रुद्रिया तनूरिति। दक्षिणेनो-
त्तरवेदिं व्रतयति॥ अग्नीषोमीयस्य पशोस्तंत्रं प्रक्रमयति॥ इषे त्वेत्यादि
११५ शाखामाहृत्य तूष्णीं प्लक्षशाखाम्। आतिथ्याबर्हिः प्रस्तरं च तेनैव शुल्वेन
तूष्णीं संनह्य या जाता इत्यादि परिस्तरणादि कृत्वा। तांश्च परिधी-
न्याशुकं इध्मे। यत्कृष्णो रूपं॰ ततस्त्वां त्रिं शतिधा॰ तिस्रः समिधो
यज्ञायुरनु संचराः। इत्यादि। त्वया वेदिमिति वेदं कृत्वा। अन्तर्वेदि शाखा-
या इत्यादि। न तृतीयस्यै। कुम्भीलेपनम्। इमौ पर्णं च परिस्तृणीत
देवा देवेषु कर्मणे नामित्यादि। पात्रप्रयोगकाले। प्रचरणीं स्रुचं
सप्तमीं प्रयुनक्ति। तस्या जुहूवत्कल्पः। न बर्हिवरणम्। पवित्रे कृत्वा

म

स्था। यजमानवाचं यच्छेत्यादि। प्रोक्षणीः संस्कृत्य ब्रह्माणमामंत्र्य पात्राणि पशुः
प्रोक्षति। अत्र वाचं विसृजते। तूष्णीं स्फ्यमादाय। सदोहविर्धानयो-
र्मध्ये स्फ्यं तिर्यञ्चं स्तब्ध्वा संप्रेष्यति। प्रोक्षणीरासादयेत्यादि पत्नी
१२० वर्जम्। सदोहविर्धानयोर्मध्ये प्रोक्षणीरासादयति। नेध्माबर्हिषोरासा-
दनम्। जुहूं संमृज्य तद्वत्प्रचरणीम्। वसाहोमहवन्यादि पशुवत्। अग्ने
गृहपत इत्यादि प्राजहितं जपति। आज्याधिश्रयणं शालामुखीये सदोह-
११६ विर्धानयोर्मध्ये स्फ्य लेखायामासादयति। आज्यग्रहणकाले अस्त्राणा
भादित स्तूष्णीं चतुर्गृहीतं गृहीत्वा पाशुकान्याज्यानि गृह्णाति। नैतु वसे-
मस्पत्नी वेदिं नर्णेन सीदतु। प्रतिप्रस्थाता पत्नीमुदानयति। अग्ना हमनु-
व्रामिनी स्वो लोके विशा इह। पत्नी शालामुखीयमुपोपविशति। सुप्रजसः
स्त्वा वयमिति जपति। एतस्मिन्काले ब्रह्मा। अपरेणोत्तरवेदिं प्रत्याक्रम्यो-
प्रोक्षणीरासादय स्रुवश्च स्रुचश्च सम्मृड्ढि पत्नीं सन्नह्य ११८।

त्तरेण हविर्धानमाग्नीध्रीयं च गत्वा पूर्वयाद्वारा प्राग्वꣳशं प्रविश्यापरेण
शालामुखीयं दक्षिणातिक्रम्योपविशति। एवं वेदस्वेत्युपस्थे राजानं
१२१ कुरुते। अध्वर्युः। सम पित्रा तान्ह्वयध्वम्। इति संप्रेष्यति। यजमान-
स्यामात्यान्सꣳह्वयन्ति। अध्वर्युं यजमानोऽन्वारभते। यजमानं पत्नी।
११८ पत्नीमितरे पुत्रभ्रातरः। अहतेन वाससा मात्यान्संनह्याद्य वाससोऽ
न्ते स्रुग्दण्डमुपनियम्य प्रचरण्या वैसर्जनानि जुहोति। त्वꣳ सोम
तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्तासि वरूथꣳ स्वाहा। सोमायेदं।
जुषाणो अप्तुराज्यस्य वेतु स्वाहा। सोमायेदं। अथ गार्हपत्ये जुहोत्यग्निर्व-
शेषमत्ति। प्रत्याहुते सोमं गृहीत्वा निष्क्रम्य प्राग्वꣳशस्य द्वारि तिष्ठति।
आ सोमं ददते। आ ग्रावाण आ वायव्यानि। द्रोणकलशम्। यजमानपत्नी...

६०॥ चात्वाला: पत्नीमानयन्ति । अजमनुनयन्ति । शालामुखीये प्रणयनीयमिध्मा-सोमनग्न-
माहीप्य सिकताभिरुपयाम्य । अग्नीषोमाभ्यां प्रणीयमानाभ्यामनुब्रूहि ।
इति संप्रेष्यति । प्रथमायां त्रिरनूक्तायां । अयं नो अग्निर्वरिवः कृणोत्व-
